## आम्रहरिद्रा (प्रकन्दः)

आम्रगन्धा हरिद्रा तु शीतला वातला तथा।
पित्तहृत् स्वादु तिक्ता च वृष्या स्यात्सन्निपातजित्।।1118।।
[कै. नि., ओषधि वर्ग]

आम्रगन्धिर्हरिद्रा या सा शीता वातला मता।
पित्तहृत् मधुरा तिक्ता सर्वकण्डूविनाशिनी।।199।।
[भा. प्र. नि., हरितक्यादि वर्ग]

अम्ला रुचिप्रदा लघ्वी दीपनी च वरा सरा।
कफं चोग्रव्रणं कासं श्वासं हिक्कां ज्वरं जयेत्।
अभिघातभवं शोफं लेपात् शीघ्रं विनाशयेत्।।
[शा. नि.]

## अङ्कोलः (पत्रम्)

शाङ्खन्यङ्कोठसुमनः करवीरसुवर्चलाः ।
शोधनानि कषायाणि वर्गश्चारग्वधादिकः ।।12।।

(सु.सू. 37)

मत्स्यविषे-

अंकोलवृक्षदलधूपविधानयोगान्
नाशं प्रयाति विषमाशु नरस्य मात्स्यम् ।
धूपः पुनः कटुकतैलनृकेश सक्तुक्लृप्तोऽस्य
दंशपदके सुतरां प्रशस्तः ।।

(शो. नि.)

अङ्कोलः स्निग्धतीक्ष्णोष्णः कटुको वातनाशनः ।
कुक्कुराखुविषं हन्ति ग्रहजन्तुविषापहः ।।251।।
भूतहृद् विषहृच्चैव कण्ठयः सूतस्य शोधनः ।

(ध.नि.,गुडूच्यादि वर्ग.)

अङ्कोलस्तिक्तकः स्निग्धः तीक्ष्णोष्णस्तुवरः कटुः ।
वामनो रेचनो हन्ति शूलशोफग्रहकृमीन् ।। 927 ।।
विसर्पकफपित्तास्रकुक्कुराखुविषं विषम् ।

(कै.नि., औषधि वर्ग)

अङ्कोलः कटुकः स्निग्धो विषलूतादिदोषनुत् ।
कफानिलहरः सूतशुद्धिकृत् रेचनीयकः ।।

(रा.नि., प्रभद्रादिवर्ग.)

अङ्कोटकः कटुस्तीक्ष्णः स्निग्धोष्णस्तुवरो लघुः ।
रेचनः कृमिशूलामशोफग्रहविषापहः ।
विसर्पकफपित्तास्रमूषकाहिविषापहः ।। 140 ।।

(भा.प्र.नि., गुडूच्यादि वर्ग)

## आरग्वध (शाखा त्वक्)

चतुरङ्गुल मृदु विरेचनानाम्।।39।।
(च. सू. 25)

आरग्वधस्य मूलेन शतकृत्वः श्रृतं घृतम्।
पिबेत् कुष्ठं जयत्याशु भजन् सरवदिरं जलम्।।13।।
(अ.हृ.चि. 19)

उपदंशे - - - - शम्याकानां पृथक् पृथक्।
मूलेन परिपिष्टेन वारिणा - - - - - - ।।
असाध्यापि व्रजत्यस्तं लिंगोटया रुक् प्रलेपनात्।।21।।
(ग. नि. 4/8)

आरग्वधो रसे तिक्तो गुरूष्णः कृमिशूलनुत्।
कफोदरप्रमेहघ्नः कृच्छ्रगुल्मत्रिदोषजित्।।216।।
(ध.नि., गुडूच्यादि वर्ग)

आरग्वधो हिमस्तिक्तो मधुरोमृदुरेचनः।
गुरूर्दोषत्रयहरो ज्वरगुल्मोदरापहः।।944।।
शूलोदावर्तहृद्रोगव्रणकृच्छ्रप्रमेहनुत्।
(कै. नि., ओषधि वर्ग)

आरग्वधोऽतिमधुरः शीतः शूलापहारकः।
ज्वरकण्डूकुष्ठमेहकफविष्टम्भनाशनः।।47।
(रा. नि., प्रभद्रादि वर्ग)

आरग्वधोगुरूः स्वादुः शीतलः स्त्रंसनोत्तमः।
ज्वरहृद्रोगपित्तास्रवातोदावर्त्तशूलनुत्।149।।
(भा.प्र.नि., हरीतक्यादि वर्ग)

## आस्फोटा (- ता) (मूलम्)

भल्लातकास्फोतकण्डीर---------- चोष्णवीर्याणां---- ।।263।।
( च.चि. 3)

पित्तजग्रहण्यां-
षड्ग्रन्थाशारिवास्फोता--------- घृतात्पचेत् ।।126।।
(च.चि.15)

द्वेबले शारिवास्फोता----- सर्वविषाणां स्याद्घृतोत्तमम् ।।245।।
(च.चि.23)

क्षारनिर्माणे-
अथानेनैव विधानेन कुटजपलाश----- तिल्वकार्कः
इन्द्रवृक्षास्फोता------ समूलफलपत्रशाखां दहेत् ।।99।।
(सु. सू. 11)

अर्शःसु तक्रकल्पः ।।13।।
(सु. चि. 6)

कुष्ठघ्न तैले-
स्नुहीशिरीषयोर्मूलं चित्रकास्फोतयोरपि ।।54।।
(सु. चि. 9)

मूषिकविषे-
आस्फोतमूलसिद्धं वा----- घृतं पिबेत् ।।40।।
(सु. क. 7)

## भूर्जः ( शा.त्वक्)

गर्भसंगे अपरापातने च-
भूर्जपत्रधूमं शिंशपासारधूमं वा।।38।।
(च.शा.8)

भूर्जपत्रकाचमणिसर्पनिर्मोकैश्चास्या योनिं धूपयेत् ।।41।।
(च.शा.8)

भूर्जलांगलिकीतुम्बीसर्पत्वक्कुष्ठसर्षपैः ।।86।।
(अ.हृ.,1)

पृथग् द्वाभ्यां समस्तैर्वा योनिलेपनधूपनम् ।। (अ.हृ.शा.1.86)

भूर्जः कषायो जयति बलासं पित्तशोणितम्।।818।।
मेदो भूतग्रहं रक्षःकर्णरोगविषप्रणुत्।।
(कै. नि., ओषधि वर्ग)

भूर्जः कटुकषायोष्णो भूतरक्षाकरः परः।।
त्रिदोषशमनः पथ्यो दुष्टकौटिल्यनाशनः।।23।।
(रा. नि., प्रभद्रादि वर्ग)

भूर्जो भूतग्रहश्लेष्मकर्णरुक्पित्तरक्तजित्।।47।
कषायो राक्षसघ्नश्च मेदोविषहरः परः।।48।।
(भा. प्र.नि., वटादिवर्ग)

## चण्डा(मूलम)

चण्डानतंत्वक्सुरदारुरास्ना . . . . . शीतं निहन्यादचिरात् प्रदेहो ।। 26।।

(च.सू. 3)

कफज शोथे

चण्डागुरूभ्यामनुलेपनंच ।। 70।।

(च.चि.12)

शटीपुष्करमूलाम्लवेतसैला . . . . . . जीवन्तीचण्डा इति
दशेमानि श्वासहराणि भवन्ति ।।37।।

(च. सू. 4)

एलातगर . . . . चण्डा चोचचोरकवालुक. . . . . पुन्नागकेशरं चेति ।।24।।
एलादिको वातकफौ निहन्याद्विषमेव च ।
वर्णप्रसादनः कण्डूपिडकाकोठनाशनः ।।25।।

(सु.सू. 38)

## चोरक (मूलम्)

हिंगु........ चोरक ..... इति दशोमानि संज्ञास्थापनानि भवन्ति।।48।।
(च.सू.4)

शिर:शूले-
शिरोरुजायां सघृतः प्रदेहो लोहैरकापद्मकचोरकैश्च ।।24।।
(च.सू. 3)

धूपनार्थम्-
धूपनानि पुनर्नवासिसो शयनास्तरणप्रावरणानांच
यवसर्षपातसीहिंगुगुग्गुलुवचाचोरकवयःस्थागोलोमी
जटिलापलंकषाशोकरोहिणीसर्पनिर्मोकाणि घृतयुक्तानि स्युः ।।62।।
(च.शा. 8)

उन्मादे-
सिद्धं सर्पिर्हितं तद्वद् वयःस्था हिंगुचोरकैः ।।57।।
(च.चि.9)

अपस्मारे-
वचाशम्याककैटर्यवयः स्थाहिंगुचोरकैः
सिद्धं पलंकषायुक्तैर्वातश्लेष्मात्मके घृतम् ।।27।।
अपेतराक्षसीकुष्ठपूतनाकेशिचोरकैः ।
उत्सादनं मूत्रपिष्टैर्मूत्रैरेवावसेचनम् ।।39।।
(च.चि. 10 )

हिक्काश्वासयोः -
दशमूलरसे सर्पिर्दधिमण्डे च साधयेत् ।
कृष्णासौवर्चलक्षारवयःस्थाहिंगु चोरकैः ।।
कायस्थयाच तत्पानाद्धिक्काश्वासौ प्रणाशयेत् ।।140-141।।
(च.चि.17)

प्रतिश्याये-
घ्रेयाश्च रोहिषाजाजीवचातर्कारिचोरकाः ।
त्वक्पत्रमरिचैलानां चूर्णा वा सोपकुञ्चिकाः ।।138।।
(च.चि.26)

मनोविकारे-
जात्याः सौमनसायिन्या रजन्याश्चोरकस्य वा-----
घृतं मनोविकारेषु पिबेद्वमनमुत्तमम्।।14।।
(च. क. 4)

विषे-
एकसरगणे विषापहे ।।84-86।।
(सु.क.5)

एलायुग्म- - - - चोरकचोच- - - नागाह्वयम्।।43।।
एलादिको वातकफौ विषं च विनियच्छति ।
वर्णप्रसादनः कण्डूपिटिकाकोठनाशनः ।। 44।।
(अ.हृ.सू. 15)

शीतज्वरे-
तगरादि तैले ।।135-139।।
(अ.हृ.चि. 1)

बालरोगे-
वचावयःस्थातगरकायस्थाचोरकैःश्रृतम् ।
बस्तमूत्रसुराभ्यांच तैलमभ्यंजने हितम् ।।53।।
(अ.हृ.उ.2)

चोरकोऽशिशिरो (पाठा. चोरकः शिशिरोऽत्यन्तं) विषरक्तान्तकारकः।
कुष्ठकण्डूव्रणान्हन्ति क्षणाद्दोषान्प्रयोगतः।।72।।
चोरकश्चोग्रगन्धश्च तिक्तः कृमिसमीरजित्।
(ध. नि., चन्दनादि वर्ग)

चोरको मधुरस्तिक्तः कटु पाकः कटुर्लघुः ।। 112।।
तीक्ष्णो हृद्यो हिमो हन्ति कुष्ठ कण्डू कफानिलान्।
रूक्षोऽश्री स्वेदमेदोऽस्र ज्वर गन्ध विष व्रणान्।(113)
(भा.प्र.नि., कर्पूरादि वर्ग)

चोरकस्तीव्रगन्धोष्णस्तिक्तो वातकफापहः।
नासामुखरुजाजीर्णकृमिदोषविनाशनः।।129।।
(रा. नि., चन्दनादि वर्ग)

## दर्भः (मूलम्)

वीरण . . . . . . दर्भकुश . . . . दशेमानि स्तन्यजननानि भवन्ति ।।17।।
(च.सू.4)

वृक्षादनी . . . . दर्भकुश . . . . दशेमानि मूत्रविरेचनीयानि भवन्ति ।।35।।
(च.सू. 4)

यानि तु खलु वमनादिषु.....दर्भपोटगल.....कल्पसंग्रहो वमन द्रव्याणाम् ।।143।।
(च.वि.8)

मधुरस्कन्धः -
जीवकर्षभक्तौ. . . . दर्भकुश. . . . . चेति ।।146।।
(च. वि. 8)

पंचानां पंचमूलानां . . . . . शरेक्षुदर्भकाशानां शालीनां मूलमेव च।
इतिब्राह्मरसायनम् ।।42-55।।
(च.चि. 1-1)

वरूणार्तगल . . . . दर्भा बृहतीद्वयं चेति ।
वरूणादिगणो ह्येष कफमेदोनिवारणः ।
विनिहन्ति शिरःशूलगुल्माभ्यन्तरविद्रधीन् ।।8।।
(सु.सू.38)

वीरतरू . . . . दर्भ . . . श्वदंष्ट्रा चेति ।
वीरतर्वादिरित्येष गणो वातविकारनुत् ।।
अश्मरीशर्करामूत्रकृच्छ्राघातरूजापहः ।। 10-11 ।।
( सु.सू.38)

कुशकाशनलदर्भकाण्डेक्षुका इति तृणसंज्ञकः ।
मूत्रदोषविकारं च रक्तपितं तथैव च ।। 75-76 ।।
(सु.सू. 38)

दर्भयुग्मं पवित्रं स्यान्मूत्रकृच्छ्रघ्नशीतलम् ।
रक्तपित्तप्रशमनं केवलं पित्तनाशनम् ।। 119।।
(ध.नि. करवीरादि वर्ग)

दर्भः स्निग्धो हिमः स्वादु कषायः कफपित्तहा ।
विसर्पदाहकृच्छ्राश्मतृष्णाबस्तिविकारनुत ।। 1241 ।।
(कै.नि., ओषधि वर्ग)

दर्भौ द्वौ च गुणे तुल्यौ तथाऽपि च सितोऽधिकः ।
यदि श्वेतकुशाभावस्त्वपरं योजयेत् भिषक् ।।94।।
(रा.नि., शाल्मल्यादि वर्ग)

दर्भद्वयं त्रिदोषघ्नं मधुरं तुवरं हिमम् ।
मूत्रकृच्छ्राश्मरी तृष्णाबस्तिरुक् प्रदरास्रजित् ।।
(भा.प्र.नि. गुडूच्यादि वर्ग)

**धन्वयासः (सं. व.)**

कुटजबिल्व-------- धन्वयासक----------- चव्यानीति
दशेमानि अर्शोघ्नानि भवन्ति ।।12।।
(च. सू. 4)

नागरधन्वयवासक----------- तृष्णानिग्रहणानि भवन्ति।।29।।
(च. सू. 4)

दुरालम्भा स्वादुशीता तिक्ता दाहविनाशिनी।
विषमज्वरतृच्छर्दिमेहमोहविनाशिनी ।।20।।
[ध. नि., गुडूच्यादि वर्ग]

धन्वयासो हिमस्तिक्तः कषायो मधुरो लघुः ।।985।।
सर निहंति पित्तास्रकफमेदोमदभ्रमान्।
विसर्पकुष्ठवातास्रतृष्णाकासवमिज्वरान्।।986।।
[कै. नि., ओषधि वर्ग]

यासः स्वादुः सरस्तिक्तस्तुवरः शीतलो लघुः।
कफमेदोमदभ्रान्तिपित्तासृक्कुष्ठ कासजित्।
तृष्णाविसर्पवातास्रवमिज्वरहरः स्मृतः।।213।।
[भा.प्र.नि., गुडूच्यादि वर्ग]

## द्रवन्ती (बीज)

दन्तीद्रवन्ती फलजं तैलं दूष्योदरे हितम् ।। 154 ।।
शूलानाहविबन्धेषु मस्तुयूषरसादिभिः ।
(च.चि. 13)

नागदन्तीत्रिबृद्दन्तीद्रवन्तीस्नुक्पयः फलैः ।
सधितं माहिषं सर्पिः सगोमूत्राढकं हितम् ।। 241 ।।
सर्पकीटविषार्तानां गरार्तानां च शान्तये ।
(च.चि. 23)

मूलैर्वाऽप्यश्वगन्धाया मूलैरर्कस्य वा भिषक् ।
पिचुमर्दस्य वा मूलैरथवा देवदारूणः ।। 50 ।।
क्षौद्रसर्षपवल्मीकमृत्तिकासंयुतैर्भिषक् ।
गाढमुत्सादनं कुर्यदूरूस्तम्भे प्रलेपनम् ।। 51 ।।
दन्तीद्रवन्तीसुरसासर्षपैश्चापि बुद्धिमान ।
(च.चि. 27)

श्यामामहाश्यामात्रिबृद्दन्ती ------पुत्रश्रेणी सुवर्णक्षीरो चेति ।। 29 ।।
उक्तः श्यामादिरित्येष गणो गुल्मविषापहः ।
आनाहोदरविड्भेदी तथोदावर्तनाशनः ।। 30 ।।
(सु.सू. 38)

दन्तीद्रवन्त्योर्मूलानि विशेषान्मृत्कुशान्तरे ।
पिप्पलीक्षौद्रयुक्तानि-----------शोषयेत् ।।46 ।।
ततस्त्रिवृद्धिधानेन योजयेच्छूलेष्मपित्तयोः ।
(सु.सू. 44)

दन्तीद्रवन्ती -------------यवासकैः ।। 49 ।।
विश्वभेषजमृद्वीका -------मूत्रभावितम् ।
सप्ताहं सर्पिषा चूर्णं योज्यमेतद्विरेचनम् ।। 50 ।।
(सु .सू. 44)

तुम्बीकोशाम्रदन्तीद्रवन्तीश्यामा -------स्नेहास्तिक्तकटुकषाया ।
अधोभागदोषहराः कृमिकफकुष्ठानिलहरा दुष्टव्रणशोधनाश्च ।। 124 ।।
(सु.सू. 45)

जीमूतकैः कोशवतीफलैश्च
दन्तीद्रवन्तीत्रिवृतासु चैव ।। 20 ।।

सर्पिः कृतं हन्त्यपची प्रवृद्धां
द्विधा प्रवृत्तं तदुदारवीर्यम्

(सु.चि. 18)

तत्र तिल्वकैरण्डकोशाम्रदन्तीद्रवन्ती -----स्नेहा विरेचयन्ति ।। 5 ।।

(सु.चि. 5)

द्रवन्ती ग्रहणीतृष्णात्रिदोषशमनी हिता ।
अभिच्छिन्नतनौ ग्रन्थ्यां प्रमेहे जठरे गरे ।। 226 ।।
कफपित्तामये पाण्डौ कृमिकोष्ठ भगंदरे ।
द्रवन्ती हृद्रोगहरा कफकृमिविनाशिनी ।। 227 ।।

(ध.नि. गुडूच्यादि वर्ग )

द्रवन्ती मधुरा शीता रसबन्धकरी परा।
ज्वरघ्नी क्रिमिहा शूल-शमनी च रसायनी ।। 136 ।।

(रा.नि., पर्पटादि वर्ग)

## दुग्धिका (सं. व.)

क्षीरिणी राजक्षवक-------- ऋष्यगन्धा इति
दशेमानि बृंहणीयानि भवन्ति।।2।।

(च. सू. 4)

नागार्जुन्यतिसारघ्नी ।।585।।

(सो. नि. II)

गोरक्षदुग्धी मधुरा वृष्या सा ग्राहिणी हिमा।
सर्ववश्यकरी चैव रसे सिद्धिगुणप्रदा।।54।।

(रा. नि., पर्पटादि वर्ग.)

दुग्धिकोष्णा गुरू रूक्षा वातला गर्भकारिणी।।275।।
स्वादुक्षीरा कटुस्तिक्ता सृष्टमूत्रा मलापहा।
स्वादुर्विष्टम्भिनी वृष्या कफकुष्ठक्रमिप्रणुत्।।276।।

[भा.प्र.नि., गुडूच्यादि वर्ग]

नागार्जुनी तु मधुरा वृष्या रूक्षा च ग्राहिणी।
तिक्ता च वातला गर्भस्थापनी कटुका पटुः।
धातुवृद्धिकरी हृद्या चोष्णा पारदबन्धिनी।
मलस्तम्भकरी मेहकफकुष्ठकृमीन् हरेत्।

[नि. र.]

## एलवालुकम् (बीजम्)

कुष्ठैलवालुक कटफल.....वसुकोशीराणीति दशेमानि शुक्रशोधनानि भवन्ति।।20।।
शालकट्फल- - - - - - शिरीषवञ्जुलैलवालुकाशोका
इति दशेमानि वेदनास्थापनानि भवन्ति।।47।।

(च.सू. 4)

लोध्रसावरलोध्र. . . . कटफलैलवालुकशल्लकी . . . . कदली चेति।।14।।
एष रोध्रादिरित्युक्तो मेदः कफहरो गणः।
योनिदोषहरः स्तम्भी वर्ण्यो विषविनाशनः।।15।।

(सु.सू. 38)

रोध्रशाबरक. . . . सैलवालुपरिषेलवमोचाः।।26।।
एषरोध्रादिको नाम मेदः कफहरो गणः।
योनिदोषहरः स्तम्भी वर्ण्यो विषविनाशनः।।27।।

(अ.हृ.सू. 15)

एलवालुः सुगन्धिः स्याच्छीतोऽत्यन्तं प्रकीर्तितः।
विषविध्वंसनोऽ त्युग्रकण्डूकुष्ठव्रणान्तुकृत्।।76।।

(ध. नि., चन्दनादि वर्ग)

एल्वालु शीतलं हन्ति कण्डूकुष्ठकफक्रिमीन्।
तृट्छर्दिकफपित्तास्रहन्मूत्रगदजिल्लघु।।17।

(म.पा.नि., कर्पूरादि वर्ग, पृ.क्र. 79)

एलवालु कटुकं पाके कषायं शीतलं लघु।।1324।।
हन्ति कण्डूव्रणच्छर्दितृट्कासारूचि हृद्रुजः।
बलासविषपित्तास्रकुष्ठमूत्रविषकृमीन्।।1325।

(कै. नि., ओषधिवर्ग)

एलवालुकमत्युग्रं कषायं कफवातनुत।
मूर्च्छार्तिज्वर दाहांश्च नाशयेद्रोचनं परम्।।126।।

(रा. नि., शताह्वादि वर्ग)

एलालु कटुकं पाके कषायं शीतलं लघु।
हन्तिकण्डूव्रणच्छर्दितृट्कासारूचिहृद्रुजः।।
बलास विषपित्तास्रकुष्ठमूत्रगदक्रिमीन्।।121।।

(भा.प्र.नि., कर्पूरादि वर्ग)

## गण्डीरः (मूलम्)

वायु वत्सादनी हन्यात् कफं गण्डीर चित्रकौ।।106।।
[च. सू. 27]

गण्डीरो जलपिप्पल्यस्तुम्बरू श्रृङ्गबेरिका।
तीक्ष्णोष्णकटुरूक्षाणि कफवातहराणिच ।।171।।
[च. सू. 27]

सरलदेवदारुशिंशपागुरुगण्डीर सारस्नेहास्तिक्तकटुकषायाः।
दुष्टव्रणशोधनः कृमिकफकुष्ठानिलहराश्च।।123।।
[सु. सू 45]

विदाही बद्धविण्मूत्रं रूक्षं तीक्ष्णोष्णमेवच।
त्रिदोषं सार्षपं शाकं गाण्डीरं वेगनामच।।238।।
[सु. सू 46]

गण्डीर- - - - - - कृमिविनाशनम्।।49।।
(सोढल, नि.I)

काण्डीरः (गण्डीरः?) कटुतिक्तोष्णः सरो दुष्टव्रणार्तिजित्।
लूतागुल्मोदरप्लीहशूलमन्दाग्निनाशनः।।63।।
(ध. नि., करवीरादि वर्ग)

## गवेधुक (मूलम)

सकोरदूषः श्यामाकः कषायमधुरो लघुः ।
वातलः कफपित्तघ्नः शीत संग्राहिशोषणः ।।16।।
हस्तिश्यामाक. . . .गवेधुका . . . श्यामाकसदृशा गुणैः ।।18।।
(च.सू. 27)

गवेधुका कटुः कार्श्यकरी स्वाद्वी कफापहा ।।107।।
(कै.नि.धान्यवर्ग)

गवेधुः कटुका स्वाद्वी कार्श्यकृत्कफनाशिनी ।।85।।
(भा. प्र.नि. धान्यवर्ग)

आरग्वधमदनगोपघोण्टा--------- सुषवी चेति।।6।।
आरग्वधादिरित्येष गण श्लेष्मविषापहः।।
मेहकुष्ठज्वरवमीकण्डूघ्नो व्रणशोधनः।।7।।
(सु. सू. 38)

आरग्वधेन्द्रयव-------- बाणघोण्टाः।।17।।
आरग्वधादिर्जयति छर्दिकुष्ठविषज्वरान्।
कफंकण्डूं प्रमेहं च दुष्टव्रणविशोधनः।।18।।
(अ.हृ.सू.15)

घोटिका कटुकोष्णा च मधुरा वातनाशनी।
व्रणकण्डूतिकुष्ठासृग्दोषश्वयथुहारिणी।।61।।
[रा. नि., शागुन्द्रः (- न्द्रा) (मूलम्)

वीरणशालि-------------- गुन्द्रेत्कटतृणमूलानीति
दशेमानि स्तन्यजननानि भवन्ति।।17।।
[च. सू. 4]

वृक्षादनी श्वदंष्ट्रावसुक------- गुन्द्रेत्कटमूलानीति
दशेमानि मूत्रविरेचनीयानि भवन्ति।।35।।
[च. सू. 4]

वीरतरु ------ वृक्षादनीगुन्द्रानल----- श्वदंष्ट्रा चेति।।12।।
वीरतर्वादिरित्येष गणो वातविकारनुत्।।
अश्मरीशर्करामूत्रकृच्छ्राघातरु जापहः।।13।।
(सु. सू. 38)

चन्दन----- शतावरीगुन्द्रा---- समासेन पित्तसंशमनो वर्गः ।।8।।
(सु. सू. 39)

कषायानुरसः स्वादुः शीतलो मूत्रकृच्छ्रहा।
रक्तपित्तहरो गुण्ठो रजःशुक्रविशोधनः ।।82।।
[ध.नि., गुडूच्यादि वर्ग]

गुन्थः कषायो शिशिरो मधुरो रक्तपित्तजित्।
स्तन्यशुक्ररजोमूत्रशोधनी मूत्र कृच्छ्रहृत्।।857।।
[कै. नि. ओषधि वर्ग]

गुन्द्रः कषायो मधुरः शिशिरः पित्तरक्तजित्।
स्तन्यशुक्ररजोमूत्रशोधनी मूत्रकृच्छ्रहृत्।।163।।
[भा.प्र.नि., गुडूच्यादि वर्ग]

## गुन्द्रः (- न्द्रा) (मूलम्)

वीरणशालि---------------- गुन्द्रेत्कटतृणमूलानीति
दशेमानि स्तन्यजनननानि भवन्ति।।17।।
[च. सू. 4]

वृक्षादनी श्वदंष्ट्रावसुक------- गुन्द्रेत्कटमूलानीति
दशेमानि मूत्रविरेचनीयानि भवन्ति।।35।।
[च. सू. 4]

वीरतरु ------ वृक्षादनीगुन्द्रानल----- श्वदंष्ट्रा चेति।।12।।
वीरतर्वादिरित्येष गणो वातविकारनुत्।।
अश्मरीशर्करामूत्रकृच्छ्राघातरु जापहः।।13।।
(सु. सू. 38)

चन्दन---------- शतावरीगुन्द्रा----------- समासेन पित्तसंशमनो वर्गः ।।8।।
(सु. सू. 39)

कषायानुरसः स्वादुः शीतलो मूत्रकृच्छ्रहा।
रक्तपित्तहरो गुण्ठो रजःशुक्रविशोधनः ।।82।।
[ध.नि., गुडूच्यादि वर्ग]

गुन्थः कषायो शिशिरो मधुरो रक्तपित्तजित्।
स्तन्यशुक्ररजोमूत्रशोधनी मूत्र कृच्छ्रहृत्।।857।।
[कै. नि. ओषधि वर्ग]

गुन्द्रः कषायो मधुरः शिशिरः पित्तरक्तजित्।
स्तन्यशुक्ररजोमूत्रशोधनी मूत्रकृच्छ्रहृत्।।163।।
[भा.प्र.नि., गुडूच्यादि वर्ग]

## हिंस्रा (मूलम्)

वातिकयोनिव्यापदि-
हिंस्राकल्कं तु वातार्ता कोष्णमभ्यज्य धारयेत् ।।62।।
(च.चि. 30)

अहिंस्रा चैव रास्ना च प्रलेपो वातशोफजित् ।।3।।
(वृ. मा. 44)

कन्थारी कटुका सोष्णा श्वासकासत्रिदोषहा।।830।।
(कै. नि., ओषधि वर्ग)

कन्थारी कटुतिक्तोष्णा कफवातनिकृन्तनी।
शोफघ्नी दीपनी रुच्या रक्तग्रन्थिरुजापहः ।।21।।
[रा. नि. , शाल्मल्यादिवर्ग]

## हिंगुपत्री (पत्रम्)

बाष्पिका कटुतिक्तोष्णा हृद्या वातकफापहा ।
कृमिप्लीहविबन्धर्शोगुल्महृद्बस्तिशूलनुत् ।।39।।
(ध.नि., शतपुष्पादि वर्ग)

हिंगुपत्री कटुस्तीक्ष्णा तिक्तोष्णा कफवातनुत्।
आमकृमिहरा रुच्या पथ्या दीपनपाचनी।।40।।
(रा. नि., पिप्पल्यादि वर्ग)

हिंगुपत्री भवेद्रुच्या तीक्ष्णोष्णा पाचनी कटुः ।
हृद्बस्तिरुग्विबन्धार्शःश्लेष्मगुल्मानिलापहा ।। 264।।
(भा.प्र.नि.,गुडूच्यादि वर्ग)

## इत्कट (मूलम्)

वीरणशालि------ गुन्द्रेत्कट कतृणमूलानाति
दशेमानि स्तन्यजननानि भवन्ति ।।117।।
(च.सू. 4)

वृक्षादनी ------- गुन्द्रेत्कटमूलानीति दशेमानि
मूत्रविरेचनीयानि भवन्ति ।।35।।
(च.सू. 4)

इत्कटांकुरजस्तद्वत् स्वरसो नेत्रणम् ।।
(वृन्द, नेत्ररोगाधिकार)

## इत्कट (काण्ड)

वीरणशालि -----------------गुन्द्रेत्कटकतृणमूलानीति
दशेमानि स्तन्यजननानि भवन्ति ।। 17 ।।
(च.सू. 4)

वृक्षादनी ------------ गुन्द्रेत्कटमूलानीति दशेमाणि
मूत्रविरेचनीयानि भवन्ति ।। 35 ।।
(च.सू. 4)

चन्दनाद्यै तैले ---चन्दन ---दूर्वेत्कट कषायकारयेत् ।। 258 ।।
(च.चि. 3)

क्षीरजननानि --------इत्कटमूलकषायाणांच पानमिति ।
(च.शा. 8/57)

मधुरस्कन्धे पठितः ।। 146 ।।
(च.वि. 35)

दिवास्वप्न ----इत्कटमाष -----श्लंष्मा प्रकोपमायद्यते ।। 23 ।।
इत्कटांकुरजस्तद्वत् स्वरसो नेत्रपूरणम् ।।
(वृन्द, नेत्ररोगाधिकार)

## जलपिप्पली (सं. व.)

गण्डीरो जलपिप्पल्यस्तुम्बुरुः श्रृङ्गवेरिका।
तीक्ष्णोष्णकटुरूक्षाणि कफवात हराणि च।।166।।
(च. सू. 27)

जलपिप्पलिका तिक्ता कषाया कफपित्तजित्
(पाठा कफवार्तजित)।
श्वासास्रविषदाहार्ति भ्रममूर्च्छातृषापहा।।65।।
(ध. नि., करवीरादि वर्ग)

जलपिप्पलिका हृद्या चक्षुष्या शुक्रला लघु।
संग्राहिणी हिमा रूक्षा रक्तदाह व्रणापहा।।
(म.पा.नि.)

जलपिप्पलिका हृद्या चक्षुष्या शुक्रला लघुः।।295।।
संग्राहिणी हिमा रूक्षा रक्तदाह व्रणापहा।
कटुपाकरसा रूच्या कषाया वह्निवर्द्धिनी ।।296।।
(भा. प्र. नि., गुडूच्यादि वर्ग)

जलपिप्पलिका हृद्या चक्षुष्या शीतला मता।
रसकाले च कटुका ग्राहिणी शुक्रला लघुः।।
रूक्षा तीक्ष्णा च तुवरा मुखशुद्धिकरी मता।
रूच्याग्निदीपनी वातकारिणी रक्तदोषहा।।
रसदोषं कृमीं दाहं व्रणं श्वासं कफं तथा।
वातं विषं भ्रमं मूर्च्छा तृषां पित्तज्वरं हरेत्।।
[शा. नि. अन्यच्च गुडूच्यादि वर्ग]

जलपिप्पलिका रूक्षा कषायाऽक्षिहिता हिमा।
कटुपाकरसा रूच्या पित्तातीसार नाशिनी।।
श्वासतृड्विषदाहार्त्तिभ्रममूर्च्छाज्वरापहा।
रसदोषहरी चैवं मुखशुद्धिकरी मता।
हृद्याग्निदीपनी वातकारिणी रक्तदोषहा।
[नि.र.]

## जीवकः (कन्दः)

जीवकर्षभक -------------- वृद्धरुहाजटिलाकुलिंगा इति
दशेमानि शुक्रजननानि भवन्ति।।19।।
[च. सू. 4]

मृद्वीकामधुक------------ जीवकजीवन्तीशालपर्ण्य इति
दशेमानि स्नेहोपगानि भवन्ति।।21।।
[च. सू. 4]

विदारीगन्धा विदारी------- जीवकर्षभकौ--------- वृश्चिकाल्यृषभी चेति।।4।।
विदारिगन्धादिरयं गणः पित्तानिलापहः।
शोषगुल्मांगमर्दोर्ध्वश्वासकासविनाशनः।।5।।
[सु. सू. 38]

लोणिकाजातुक-------- जीवकसुवर्चला---------- कुरण्टिकाप्रभृतयः।।274।।
स्वादुपाकरसाः शीताः कफघ्ना नातिपित्तलाः।
लवणानुरसाः रुक्षाः सक्षाराः वातला सराः।।275।।
[सु. सू. 46]

जीवको मधुरः शीतो रक्तपित्तानिलान् जयेत्।
दाहज्वरक्षयान् हन्ति कफशुक्रविवर्धनः।।120।।
[ध. नि., गुडूच्यादि वर्ग]

जीवकर्षभकौ शीतौ बृंहणौ कफशुक्रलौ।।92।।
मधुरौ वातपित्तास्रदाहक्षयनिबर्हणौ।
[कै. नि., ओषधि वर्ग]

जीवको मधुरः शीतो रक्तपित्तानिलार्त्तिजित्
क्षयदाहज्वरान् हन्ति शुक्रश्लेष्मविवर्धनः।।13।।
[रा. नि., पर्पटादि वर्ग]

जीवकर्षभकौ बल्यौ शीतौ शुक्रकफप्रदौ। मधुरा
पित्तदाहस्रकार्श्यवातक्षयापहौ।।125।।
(भा.प्र.नि., हरीतक्यादि वर्ग)

जीवको मधुरः शीतः शुक्रलः कफकृन्मतः।
रक्तपित्तहरो बल्यो वातपित्तज्वरापहः।।
कृशताक्षयदाहानां रक्तदोषस्य नाशकः।
(नि. र.)

**कदरः (का. म.)**

तिन्दुक. . . . .खदिरकदर. . . . .अरिमेदा इति
दशेमान्युदर्दप्रशमनानि भवन्ति।।43।।

(च. सू. 4)

शाल. . . . . खदिरकदर. . . . .मधूकैः सारासवा विंशतिः।।48।।

(च. सू. 25)

सालसाराजकर्ण खदिर कदर . . . कालीयकं चेति।।8।।
सालसारादिरित्येष गणः कुष्ठविनाशनः।
मेहपाण्ड्वागमयहरः कफमेदोविशोषणः।।9।।

(सु. सू. 38)

मधुमेहे - कदरक्रमुकषायम्।।9।।

(सु. चि.11)

मधुमेहे कदरखदिरपुरकषायम्।।8।।

(अ.सं.चि. 14)

कदरखदिरपूगक्वाथं क्षौद्राह्वये पिबेत्।।13।।

(वृ. मा.)

श्वेतस्तु खदिरस्तिक्तः शीतः पित्तकफापहः।
रक्तदोषहरश्चैव कण्डूकुष्ठविनाशनः।।28।।

(ध. नि., गुडूच्यादि वर्ग)

कदरो विशदो वर्ण्यो मुखरोगकफास्रजित्।।

(कै.नि.ओषधि वर्ग 825, भा.प्र.नि., वटादि वर्ग 33)

प्रमेहमेदोदोषघ्नः कफपित्तव्रणापहः।
पाण्डुकुष्ठप्रशमनः कदरः श्वित्रनाशनः।।

(म. नि.)

## काकजङ्.घा (बीजम)

सुरसा. . . . . . प्राचीबल. . . . . . विषमुष्टिकश्चेति।।18।।
सुरसादिर्गणो ह्येष कफहृत् कृमिसूदनः।
प्रतिश्यायारुचिश्वासकासघ्नो व्रणशोधनः।।19।।
(सु. सू. 38)

काकजङ्.घा च तिक्तोष्णा रक्तपित्त ज्वरापहा।
कृमिदोषहरा वर्ण्या विषदोषहरा मता।।21।।
(ध. नि., करवीरादि वर्ग)

काकज्ङ्.घा हिमा हन्ति रक्तपित्तकफज्वरान्।
(म. नि.)

काकजङ्.घा हिमा तिक्ता कषाया कफपित्तजित्।
निहन्ति ज्वरपित्तास्त्रव्रण कण्डूविष कृमीन्।
(कै. नि. ओषधि वर्ग, 713;
भा.प्र.नि., गुडूच्यादि वर्ग, 251)

## काकनज (फलम्)

पर्पोटयां रक्तहन्त्री च फलाम्ना ज्वरकारिणी।।664।।

(सो. नि. I)

पर्पोटी पानलेपाभ्यां रक्तविद्राविणी परम्।।571।।

(सो. नि. II)

चीरपोटा हिमा रुक्षा भेदनी श्वासकासजित्।

(म. नि.)

टंकारी वातजित् तिक्ता श्लेष्मघ्नी दीपनी लघुः।
शोथोदरव्यथाहन्त्री हिता पीठविसर्पिणाम्।।134।।

(भा.प्र.नि., गुडूच्यादि वर्ग)

चिरपोटा हिमा रुक्षा भेदनी श्वासकासजित्।
पर्पोटि पानलेपाभ्यांरक्ताविद्राविणीध्रुवम्।
तस्याः पक्वफलंपित्तश्लेष्मलं ज्वरकारिच।।

(शा. नि. परिशिष्ट- पृ. 916-917)

सस्वादुतिक्ता कुञ्ची स्यात् शूलनाशिनी।
व्रण वीसर्प कण्डूघ्नी शोफदाहहरा स्मृता।।स्व.।।

(इ.मे.प्लां., कोट्टाक्कल)

## कालीयक (मूलम्)

शैवालपद्मोत्पलवेत्रतुङ्गप्रपौण्डीकाव्यमृणाललोध्रम।
प्रियङ्गुकालेयकचन्दनानि निर्वापणः स्यात्सघृतः प्रदेहः।।26।।

(च. सू. 3)

सालसाराजकणखदिर------------- कालीयकं चेति।।8।।
सालसारादिरित्येष गणः कुष्ठविनाशनः।
मेहपाण्ड्वामयहरः कफमेदोविशोषणः।।9।।

(सु. सू. 38)

कालीयकं पवित्राढ्यं शीतलं रक्तपित्तजित्।।9।।

(ध. नि., चन्दनादि वर्ग)

कालीयकं रक्तगुणं विशेषाद् व्यङ्गनाशनम्।।15।।

(भा.प्र.नि., कर्पूरादि वर्ग)

## कालीयक (काण्ड)

शैवालपद्मनोत्पलवेत्रतुङ्गप्रपौण्डीकाव्यमृणाललोध्रम।
प्रियङ्गुकालेयकचन्दनानि निर्वापण: स्यात्सघृत: प्रदेह: ।।26।।

(च. सू. 3)

सालसाराजकणखदिर------------- कालीयकं चेति।।8।।
सालसारादिरित्येष गण: कुष्ठविनाशन:।
मेहपाण्ड्वामयहर: कफमेदोविशोषण: ।।9।।

(सु. सू. 38)

कालेयकागुरू--------- सुरसादिरारग्वधादिरिति
समासेन श्लेष्मसंशमनो वर्ग: ।।9।।

(सु. सू. 39)

कालीयकं पवित्राढ्यं शीतलं रक्तपित्तजित्।।9।।

(ध. नि., चन्दनादि वर्ग)

कालीयकं रक्तगुणं विशेषाद् व्यङ्गनाशनम्।।15।।

(भा.प्र.नि., कर्पूरादि वर्ग)

## कपीतनः (का. त्वक्)

जम्ब्वाम्र......कपीतनोदुम्बर इतिदशेमानी मूत्रसंग्रहणीयानि भवन्ति।।33।।

(च.सू.4)

प्रियङ्ग्वनन्ता-------- वटकपीतन- - - - - इति कषायस्कन्धः।।20/6।।

(च. वि. 8)

न्यग्रोधोदुम्बराश्वत्थ. . . . . कपीतन. . . नन्दीवृक्षश्चेति।।48।।
न्यग्रोधादिर्गणो व्रण्यः संग्राही भग्नसाधकः।
रक्तपित्तहरो दाहमेदोघ्नो योनिदोषहृत्।

(सु. सू. 38)

न्यग्रोधापिप्पल . . . . . . . . . . . . कपीतन सोमवल्काः।
प्लक्षाम्र. . . . . . . . . मधूकं।।41।।
न्यग्रोधादिर्गणो व्रण्यः संग्राही भग्नसाधंनः।
मेदः पित्तास्त्र तृड्दाहयोनिरोगनिबर्हणः।।42।।

(अ.ह.सू. 15)

पारिशोऽ श्वत्थको वृष्यः स्निग्धः श्लेष्मकृमिप्रदः।।

(म.पा.नि.)

फलीशो दुर्ज्जरः स्निग्ध कृमिशुक्रफप्रदः ।।434।।
फलोऽ म्लो मधुरो मूले कषाय स्वादुमज्जकः।

(कै. नि. ओषधि वर्ग)

पारीषो दुर्जरः स्निग्धः कृमिशुक्रकफप्रदः।
फलोऽम्लो मधुरो मूले कषाय स्वादुमज्जकः।।5।।

(भा.प्र.नि., वटादि वर्ग.)

याऽबला पिबति पार्श्वपिप्पलं जीरकेण सहितं हिताशिनी।
श्वेतया विशिखपुंखया युतं सा सुतं जनयतीह नान्यथा।।29।।

(भा. प्र. चि. 70)

कपीतनो लघू रूक्षः कषायः शिशिरो हरेत्।
कफपित्तप्रमेहास्त्रकुष्ठयोनिगदव्रणान्।।स्व।।

(द्र.गु.वि., प्रो. प्रि. व्र. शर्मा)

## कर्कश (मूलम्)

कौलकं कार्कशं नैम्बं ताकं पार्पटकं च यत् ।
कफपित्तहरं तिक्तं शीतं कटु विपच्यते ।। 96।।
(च.सू. 27)

कर्कोटकीयुगं तिक्तं हन्ति श्लेष्मविषद्वयम् ।
मधुना च शिरोरोगे कन्दस्तस्याः प्रशस्यते ।। 185।।
(ध. नि., गुडूच्यादि वर्ग)

वन्ध्या तिक्ता कटुस्तीक्ष्णा लघुर्व्रणविषास्त्रनुत् ।। 597।।
बलाससर्पदर्पघ्नी विसर्पविषहारिणी ।
(कै.नि. ओषधि वर्ग)

कर्कोटिकी कटूष्णा च तिक्ता विषविनाशनी ।
वातघ्नी पित्तहच्चैव दीपनी रूचिकारिणी ।।277।।
(रा.नि.मूलकादि वर्ग)

वन्ध्याकर्कोटिकी लघ्वी कफनुद् व्रणशोधिनी ।
सर्पदर्पहरी तीक्ष्णा विसर्पविषहारिणी ।। 288।।
(भा.प्र.नि. गुडुच्चयादि वर्ग)

वन्ध्याकर्कोटिकीकंदो हन्ति श्लेष्मविषद्वयम् ।।
(शोढल)

## कर्णस्फोटा (बीजम्)

कर्णस्फोटा कटुस्तिक्ता हिमा सर्वविषापहा।
ग्रहभूतादिदोषघ्नी सर्वव्याधिविनाशनी।।42।।
(रा.नि., गुडूच्यादि वर्ग)

इन्द्रवल्ली ज्वरहरा वातघ्नी वृद्धिनाशिनी।
(हृ. प्रि.)

इन्द्रवल्ली ज्वरहरा शोफपाण्डुहरा स्मृता।
वातघ्नी मूत्रला केश्या वृद्धिशूलापहारिणी।।स्वः।।
(इंडियन मेडिसिनल प्लांट्स, कोट्टाकल)

# कर्णस्फोटा (मूलम्)

इन्द्रवल्ली ज्वरहरा वातघ्नी वृद्धिनाशिनी।
(ह. प्रि.)

इन्द्रवल्ली ज्वरहरा शोफपाण्डुहरा स्मृता।
वातघ्नी मूत्रला केश्या वृद्धिशूलापहारिणी।।स्व:।।
(इंडियन मेडिसिनल प्लांट्स, कोट्टाकल)

कर्णस्फोटा कटुस्तिक्ता हिमा सर्वविषापहा।
ग्रहभूतादिदोषघ्नी सर्वव्याधिविनाशनी।।42।।
(रा.नि., गुडूच्यादि वर्ग)

## कतृण (सं. व.)

वीरण. . . . कतृणमूलनीति दशेमानि स्तन्यजननानि भवन्ति।।17।।
(च. सू. 4)

तगरागुरु.... भूतीकवचा.....पिप्पल्य इति दशेमानि शीतप्रशमनानि भवन्ति।।42।।
(च. सू. 4)

उदरे-
भूतीका नागरं धान्यं जले पक्त्वावसेचयेत्।।108।।
(च. चि. 13)

भूतृणो लघुरूष्णश्च रूक्षः श्लेष्मयापहः।
अस्य प्रयोगः सहसा हन्ति जन्तून् समुद्धतान्।।48।।
(ध. नि., करवीरादि वर्ग)

उदर्दशमनो श्लेष्मकृमिघ्नः कुष्ठ नाशनः।
सुगन्धो वातशमनो भूस्तृणोऽ रोचकापहः।।
(म. नि.)

भूस्तृणः कटुकस्तिक्तः तीक्ष्णोष्णो रोचनो लघुः।
विदाही दीपनो रूक्षो चक्षुष्यो वक्त्रशोधनः।।1249।।
अवृष्यो बहुविट्कः स्याद्रक्तपित्तप्रदूषणः।
कृमिकास वमिश्लेष्मश्वासदद्रु विनाशनः।।1250।।
(कै. नि., ओषधि वर्ग)

भूतृणं कटुतिक्तञ्च वातसन्तापनाशनम्।
हन्ति भूतग्रहावेशात् विषदोषांश्च दारूणात्।।74।।
(रा. नि. शाल्मल्यादि वर्ग)

भूतृणं कटुकं तिक्तं तीक्षणोष्णं रेचनं लघुः।
विदाही दीपनं रूक्षमनेत्र्यं मुखशोधनम्।।70।।
अवृष्यं बहुविट्कञ्च पित्तरक्तप्रदूषणम्।।71।।
(भा. नि., गुडूच्यादि वर्ग)

## कतृण (सं. व.)

वीरण. . . . कतृणमूलनीति दशेमानि स्तन्यजननानि भवन्ति।।17।।
(च. सू. 4)

तगरागुरु.... भूतीकवचा.....पिप्पल्य इति दशेमानि शीतप्रशमनानि भवन्ति।।42।।
(च. सू. 4)

उदरे-
भूतीका नागरं धान्यं जले पक्त्वावसेचयेत्।।108।।
(च. चि. 13)

भूतृणो लघुरूष्णश्च रूक्षः श्लेष्मयापहः।
अस्य प्रयोगः सहसा हन्ति जन्तून् समुद्धतान्।।48।।
(ध. नि., करवीरादि वर्ग)

उदर्दशमनो श्लेष्मकृमिघ्नः कुष्ठ नाशनः।
सुगन्धो वातशमनो भूस्तृणोऽ रोचकापहः।।
(म. नि.)

भूस्तृणः कटुकस्तिक्तः तीक्ष्णोष्णो रोचनो लघुः।
विदाही दीपनो रूक्षो चक्षुष्यो वक्त्रशोधनः।।1249।।
अवृष्यो बहुविट्कः स्याद्रक्तपित्तप्रदूषणः।
कृमिकास वमिश्लेष्मश्वासदद्रु विनाशनः।।1250।।
(कै. नि., ओषधि वर्ग)

भूतृणं कटुतिक्तञ्च वातसन्तापनाशनम्।
हन्ति भूतग्रहावेशात् विषदोषांश्च दारूणात्।।74।।
(रा. नि. शाल्मल्यादि वर्ग)

भूतृणं कटुकं तिक्तं तीक्षणोष्णं रेचनं लघुः।
विदाही दीपनं रूक्षमनेत्र्यं मुखशोधनम्।।70।।
अवृष्यं बहुविट्कञ्च पित्तरक्तप्रदूषणम्।।71।।
(भा. नि., गुडूच्यादि वर्ग)

## केबुक (प्रकन्द)

अक्षीवमरिचगण्डीर केबुक . .इति
दशेमानि क्रिमिघ्नानि भवन्ति ।।15।।
(च. सू. 4)

वृषपुष्पाणि शाङ्र्गेष्टा केम्बुकं . .कफपित्तहरं
तिक्तं शीतं कटु विपच्यते ।।96।।
(च.सू. 27)

मण्डुकपर्णी . . . . केबु (म्बु). . . . प्रभुतीनि ।।262।।
रक्तपित्त हराण्याहुर्हृद्यानि सुलघुनि च ।
कुष्ठमेह ज्वर श्वास कासारूचि हराणि च ।।263।।
(सु.सू. 46)

केमुकं कटुकं पाके तिक्तं ग्राहि हिमं लघु ।
दीपनं रोचनं हृद्यं कफपित्त ज्वरापहम् ।।1608।।
कुष्ठकासप्रमेहासृक हरते कुरूतेऽ निलम् ।
कटु स्वादु रसं वृष्यं हितं पित्तभ्रमे सदा ।।1609।।
(कै.नि., ओषिध वर्ग)

केमुकं कटुकं पाके तिक्तं ग्राहि हिमं लघु ।।110।।
दीपनं पाचनं हृद्यं कफपित्तज्वरापहम् ।।
कुष्ठकासप्रमेहास्त्रनाशनं वातलं कटु।।111।।
(भा.प्र.नि. शाक वर्ग)

## केबुक (प्रकन्द)

अक्षीवमरिचगण्डीर केबुक . .इति
दशेमानि क्रिमिघ्नानि भवन्ति ।।15।।
(च. सू. 4)

वृषपुष्पाणि शाङ्‌र्गेष्टा केम्बुकं . .कफपित्तहरं
तिक्तं शीतं कटु विपच्यते ।।96।।
(च.सू. 27)

मण्डुकपर्णी . . . . केबु (म्बु). . . . प्रभुतीनि ।।262।।
रक्तपित्त हराण्याहुर्हृद्यानि सुलघुनि च ।
कुष्ठमेह ज्वर श्वास कासारूचि हराणि च ।।263।।
(सु.सू. 46)

केमुकं कटुकं पाके तिक्तं ग्राहि हिमं लघु ।
दीपनं रोचनं हृद्यं कफपित्त ज्वरापहम् ।।1608।।
कुष्ठकासप्रमेहासृक हरते कुरूतेऽ निलम् ।
कटु स्वादु रसं वृष्यं हितं पित्तभ्रमे सदा ।।1609।।
(कै.नि., ओषिध वर्ग)

केमुकं कटुकं पाके तिक्तं ग्राहि हिमं लघु ।।110।।
दीपनं पाचनं हृद्यं कफपित्तज्वरापहम् ।।
कुष्ठकासप्रमेहास्त्रनाशनं वातलं कटु।।111।।
(भा.प्र.नि. शाक वर्ग)

## कोद्रवः (फलम्)

प्रशातिका प्रियङ्गुश्च-------- कोद्रवामुद्गाः कुलत्थाश्चक्रमुद्गकाः ।।25।।
आढकीनां-------- पानं चानु मधूदकम् ।।26।।
अरिष्टांश्चानुपानोर्थे-------- मेदोमांसकफापहान् ।
अतिस्थौल्यविनाशाय संविभाज्यप्रयोजयेत् ।।27।।
(च.सू. 21)

सकोरदूषः श्यामाकः कषायमधुरो लघुः ।
वातलः कफपित्तघ्नः शीतंसग्राहिशोषणः ।।15।।
(च. सू. 27)

कषायमधुरस्तेषां शीतः पित्तापहः स्मृतः ।
कोद्रवश्च सनीवारः श्यामकश्च सशान्तनुः ।।23।।
(सु.सू. 46)

कोरदूषः परं ग्राही स्पर्शे शीतो विषापहः ।।13।।
(अ.ह.सू. 6)

कोद्रवः शीतलो ग्राही विषपित्तकफाञ्जयेत् ।।75।।
(ध.नि., सुवर्णादि वर्ग)

कोद्रवो विषपित्तजित् हिमः ।।102।।
(कै. नि., धान्यवर्ग)

कोद्रवो मधुरस्तिक्तो व्रणानां पथ्यकारकः ।
कफपित्तहरो रूक्षो मोहकृद् वातलो गुरूः ।।124।।
(रा. नि., शाल्यादि वर्ग)

कोद्रवो वातलोग्राही हिमः पित्तकफापहः ।।80।।
(भा.प्र.नि., धान्यवर्ग)

## क्षीरकाकोली (प्र. मू.)

जीवनीय, बृंहणीय, शुक्रजनन तथा
स्नेहोपग महाकषाये पठितः ।।1,2,19,21 ।।

(च. सू. 4)

काकोली क्षीर काकोली- - - - मधुकं चेति ।।35।।
काकोल्यादिरयं पित्तशोणितानिलनाशनः ।
जीवनो बृंहणो वृष्यः स्तन्यश्लेष्मकरस्तथा ।।36।।

(सु. सू. 38)

रुचिष्या कफपित्तास्त्रंहृद्रोगशमनी मता ।
श्वासकासक्षयहरा वृष्या बस्ति विशोधनी ।।135।।

(ध. नि., गुडूच्यादि वर्ग)

काकोली मधुरा स्निग्धा क्षयपित्तानिलार्त्तिनुत् ।
रक्तदाहज्वरघ्नी च कफशुक्रल विवर्द्धिनी ।।168।।
क्षीर काकोली- रसवीर्य विपाकेषु काकोल्या सदृश च सा ।।169।।

(रा. नि., गडूच्यादि वर्ग)

काकोलीयुगलं शीतं शुक्रलं मधुरं गुरू ।
बृंहणं वातदाहास्त्र पित्तशोष ज्वरापहम् ।।137।।

(भा. प्र. नि., हरीतक्यादि वर्ग)

काकोली शीतला वृष्या मधुरा शुक्रकारिणी ।
तिक्ता कफकरी गुर्वी क्षयपित्ततृषाहरा ।।
रक्तदोषं रक्तपित्तं दाहं शोषं ज्वरं विषम् ।।
वातापित्तरूजं चैव नाशयेदिति कीर्त्तिता ।।

(नि. र.)

## क्षीरविदारी (मूलम्)

मधुर स्कन्धे पठितः ।।139।।
(च. वि. 8)

महावातव्याधौ-पानादिषु तैले पठितः
वातरक्ते पानार्थ तैलेयोगे पठितः ।।7।।
(सु. चि. 5)

क्षीरविदारिका बल्या वातापित्तहराच सा।
मधुरा बृंहणी वृष्या शीतस्पर्शाऽ तिमूत्रला।।146।।
स्तन्यदोषस्यहरणी पित्तशूलनिषूदनी (पाठा. मूढावृर्ष्याविषूदनी :)।
(ध. नि., गुडूच्यादि वर्ग)

विदारी बृंहणी वृष्याः सुस्निग्धा शीतला गुरूः ।।1583।।
मधुरा मूत्रला स्वर्या स्तन्यवर्णबलप्रदा।
पित्तानिलास्रदाहघ्नी जीवनीया रसायनी।।1584।।
(कै. नि., ओषधि वर्ग)

ज्ञेया क्षीरविदारी च मधुराम्ला कषायका।
तिक्ता च पित्तशूलघ्नी मूत्रमेहामयापहा।।104।।
(रा.नि., मूलकादि वर्ग)

## कुलञ्जनम् (प्रकन्दः)

कुलंजो गन्धमूलश्च तीक्ष्णमूलः कुलंजनः।
कुलंजः कटुतिक्तोष्णो दीपनो मुखदोषनुत् ।।55।।
[रा. नि., पिप्पल्यादि वर्ग]

सुगन्धाऽप्युग्रगन्धा च विशेषात्कफकासनुत्।
सुस्वरत्वकरी रुच्या हृत्कण्ठमुखशोधिनी।।105।।
स्थूलग्रन्थि सुगन्धा स्यात् ततो हीनगुणा स्मृता।।106।।
[भा.प्र.नि., हरीतक्यादि वर्ग]

कुलिंजनं कटुस्तिक्तमुष्णं चाग्निप्रदीपनम्।
रुच्यं स्वर्यं च हृद्यं च मुखकण्ठविशुद्धिकृत्।।
मुखदोषं कफश्वासं कासं वातं ध्रुवं जयेत्।
बृहत्कुष्ठगुणैर्ज्ञेयं न्यूनमस्मादिति स्मृतम्।।
[नि. र.]

## कुम्भी (कः) (बीजम्)

प्रियङ्गुसमङ्गा. . . . . कुम्भीक. . . . दीर्घमूला चेति।।45।।
गणौ प्रियङ्ग्वम्बष्ठादि पक्वातीसारनाशनौ।।
सन्धानीयो हितौ पित्ते व्रणानां चापि रोपणौ।।47।।
(सु. सू. 38)

कुम्भीकः श्लक्ष्णत्वक्को रोमशः कुम्भीनामा वृक्षो
यस्य त्वग्वस्त्राकारा भवति इतिऽल्हणः।।17।।
(सु. सू. 38)

कुम्भी स्थलकुम्भी यस्यास्त्वग्वक्राभवति इतिऽल्हणः।।17।।
(सु. उ. 59)

कुम्भी कटुः कषायोष्णो ग्राही वातकफापहः ।।105।।
[रा. नि., प्रभद्रादि वर्ग]

## लताकरञ्ज (बीजम्)

तत्र भद्रदारु -------------कुबेराक्षी ----------पञ्चमूल्यो,
समासेन वातसंशमनो वर्गः ।। 7 ।।
(सु.सू. 39)

कपित्थबिल्वत -----------गन्धर्वहस्तकाः ।
कुबेराक्षी च ---------------स्युर्बालानां परिषचने ।। 3 ।।
(सु. उ. 35)

शूले-
एक एव कुबेराक्षः सर्वशूलापहारकः ।
किं पुनः स त्रिभिर्युक्तः पथ्यारूचकरामहे ।। 58 ।।
(हा.सं. 37)

कुबेराक्षी यकृत्प्लीहवातघ्नीं व्रणरोपणी ।। 523 ।।
(सो.नि. II)

प्रवाहिकाथाम्-
यक्षलोचनमज्जानं काञ्जिकेन पिबेत् प्रगे ।
सश्लेष्मरक्तातीसारं कोष्ठशूलं जयेद् द्रुतम् ।। 6 ।।
(वे.म. 6)

तिरिगिच्छिर्वलापार्शः कृमिकुष्ठप्रमेहहत् ।
(म.प.नि.)

लताकरञ्जपत्रं तु कटूष्णं कफवातनुत् ।
तद्बीजं दीपनं पथ्यंशूलगुल्मव्यथापहम् ।। 25 ।।
(रा.नि., शाल्मल्यादि वर्गः)

तत्फलं कफवातघ्नं मेहार्शः कृमिकुष्ठाजित् ।। 122 ।।
(भा.प्र.नि., गुडूच्यादि वर्ग)

करञ्जमज्जो द्वितयं त्रयं वा विभर्ज्यसाकं पटुना निगीर्णम्।
शूलं समूलं हरति प्रसह्य कूलं यथा निर्झरिणीप्रवाहः ।। 510 ।।
(सि. भे. 4)

कण्टयुक्तः करञ्जस्तु पाके च तुवरः कटुः ।
ग्राहकश्चोष्णवीर्यः स्यात्तिक्तः प्रोक्तश्च मेहहा ।।
कुष्ठार्शोव्रणवातानां कृमीनां नाशनः परः ।
(शा.नि.)

## लवली फलम्

कषायविशदत्वाच्च सौगन्ध्याच्च रुचिप्रदम् ।
अवदंशक्षमं हृद्यं वातलं लवलीफलम् ।।144।।
(च.सू. 27)

कषायं कफपित्तघ्नं किंचित्तिक्तं रुचिप्रदम् ।
हृद्यं सुगन्धि विशदं लवलीफलमुच्यते ।।189।।
(सु. सू. 46)

ज्योत्स्ना मुक्ताफलं प्रोक्तं श्यामलं लवलीफलम्।
विशदं रोचनं रूक्षं हृद्यं तिक्तं कषायकम् ।।510।।
वातलं कफपित्तघ्नं सुगन्धि लवलीफलम्।
(कै. नि., ओषधि.वर्ग)

सुगन्धमूला लवली पाण्डुः कोमलवल्कला ।।79।।
लवलीफलमश्मार्शःकफपित्तहरं गुरु ।
विशदं रोचनं रूक्षं स्वाद्वम्लं तुवरं रसे ।।80।।
(भा. प्र. नि.,आम्रादिफलवर्ग)

## मधूलिका (मूलम्)

नान्दीमुखी मधूली च मधुरस्निग्धशीतले ।।21।।
(च. सू. 27)

मधूली मधुरा शीता स्निग्धा
नन्दीमुखी तथा ।।21, 25।।
(सु. सू. 46)

नृत्यकुण्डलबीजानां चूर्णं माक्षिकसंयुतम्।
अविक्षीरेण सप्ताहं पीतमश्मरीपातनम्।।30।।
[अ. हृ. चि. 11]

नर्तक: पित्तहा शीत:---------------- ।।103।।
[कै. नि., धान्य वर्ग]

रागी तु लाञ्छन: स्याब्दहुदलकणिशश्च गुच्छकणिशश्च।।136।।
तिक्तो मधुरकषाय: शीत: पित्तास्रनाशनो बलद: ।।137।।
[रा. नि., शाल्यादि वर्ग]

नर्त्तकस्तुतुवरस्तिक्तो मधुरस्तर्पणो लघु:।
बल्य: शीत: पित्तहरस्त्रिदोषशमनो मत:।।
रक्तदोषहरश्चैव मुनिभि: पूर्वमीरित:।
[नि. रत्नाकर]

## महामेदा (मूलम्/प्रकन्द:)

जीवकर्षभको मेदा महामेदा . . . . . . . . जीवन्ती मधुकमिति दशमानि
जीवनीयानि भवन्ति ।।1।।
(च. सू. 4)

काकोलीक्षीरकाकोलीजीवकर्षभकमुदगपर्णीमाषपर्णी मेदामहामेदा . . . .
. . . . . . . जीवन्त्यो मधुकं चेति ।।35।।
काकोल्यादिरयं पित्तशोणितानिलनाशन:
जीवनो बृंहणो वृष्य: स्तन्यश्लेष्मकरस्तथा ।।36।।
(सु. सू. 38)

महामेदा हिमास्वादु: कफशुक्रविवर्धनी ।
हन्ति दाहास्रपित्तानि क्षयवातज्वरै: सह ।।125।।
(ध.नि., गुडूच्यादि वर्ग)

मेदायुग्मं परं स्निग्धं शुक्लमेद: प्रवर्द्धनम् ।
मधुरं रसपाकाभ्यां जीवनं वातपितहत् ।।
(सो.नि.)

मेदाद्वयं हिमं स्वादु स्तन्यशुक्रलवलासकृत् ।
बृंहणं वातपितास्त्रक्षतक्षयहरं गुरू ।।88।।
(कै.नि., ओषधि वर्ग, 88)

महामेदा हिमारुच्या कफशुक्रप्रवृद्धिकृत् ।
हन्ति दाहास्रपित्तानि क्षयं वातं ज्वरं च सा ।।27।।
(रा.नि., पर्पटादि वर्ग)

मेदायुगं गुरु स्वादु वृष्यं स्तन्यकफावहम् ।
बृंहणं शीतलं पित्तरक्तवातज्वर प्रणुत् ।।131।।
(भा.प्र.नि. हरीतक्यादि वर्ग)

## मधूलिका (मूलम्)

नान्दीमुखी मधूली च मधुरस्निग्धशीतले ।।21।।

(च. सू. 27)

मधूली मधुरा शीता स्निग्धा
नन्दीमुखी तथा ।।21, 25।।

(सु. सू. 46)

नृत्यकुण्डलबीजानां चूर्णं माक्षिकसंयुतम्।
अविक्षीरेण सप्ताहं पीतमश्मरीपातनम्।।30।।

[अ. हृ. चि. 11]

नर्तकः पित्तहा शीतः---------------- ।।103।।

[कै. नि., धान्य वर्ग]

रागी तु लाञ्छनः स्याब्दहुदलकणिशश्च गुच्छकणिशश्च।।136।।
तिक्तो मधुरकषायः शीतः पित्तास्रनाशनो बलदः ।।137।।

[रा. नि., शाल्यादि वर्ग]

नर्त्तकस्तुतुवरस्तिक्तो मधुरस्तर्पणो लघुः।
बल्यः शीतः पित्तहरस्त्रिदोषशमनो मतः।।
रक्तदोषहरश्चैव मुनिभिः पूर्वमीरितः।

[नि. रत्नाकर]

**महामेदा (मूलम्/प्रकन्दः)**

जीवकर्षभको मेदा महामेदा . . . . . . . . जीवन्ती मधुकमिति दशेमानि
जीवनीयानि भवन्ति ।। 1 ।।
(च. सू. 4)

काकोलीक्षीरकाकोलीजीवकर्षभकमुदगपर्णीमाषपर्णी मेदामहामेदा. . . . .
. . . . . . . जीवन्त्यो मधुकं चेति ।।35।।
काकोल्यादिरयं पित्तशोणितानिलनाशनः
जीवनो बृंहणो वृष्यः स्तन्यश्लेष्मकरस्तथा ।।36।।
(सु. सू. 38)

महामेदा हिमास्वादुः कफशुक्रविवर्धनी ।
हन्ति दाहास्रपित्तानि क्षयवातज्वरैः सह ।।125।।
(ध.नि., गुडूच्यादि वर्ग)

मेदायुग्मं परं स्निग्धं शुक्लमेदः प्रवर्द्धनम् ।
मधुरं रसपाकाभ्यां जीवनं वातपित्तहृत् ।।
(सो.नि.)

मेदाद्वयं हिमं स्वादु स्तन्यशुक्रलवलासकृत् ।।
बृंहणं वातपितास्त्रक्षतक्षयहरं गुरू ।।88।।
(कै.नि., ओषधि वर्ग, 88)

महामेदा हिमारुच्या कफशुक्रप्रवृद्धिकृत् ।
हन्ति दाहास्रपित्तानि क्षयं वातं ज्वरं च सा ।। 27।।
(रा.नि., पर्पटादि वर्ग)

मेदायुगं गुरु स्वादु वृष्यं स्तन्यकफावहम् ।
बृंहणं शीतलं पित्तरक्तवातज्वर प्रणुत् ।।131।।
(भा.प्र.नि. हरीतक्यादि वर्ग)

## मधुस्नुही (मूलम्)

द्वीपान्तर वचा किञ्चित्तिक्तोष्णा वह्निदीप्तिकृत्।
विबन्धाध्मानशूलघ्नी शकृन्मूत्रविशोधिनी।
वातव्याधीनपस्मारमुन्मादं तनुवेदनाम्।
व्यपोहति विशेषेण फिरङ्गामयनाशिनी।।108।।
(भा.प्र.नि., हरीतक्यादिवर्ग)

चोबाचीनी भवं चूर्णं शाणमानं समाक्षिकम्।
फिरङ्ग व्याधिनाशाय भक्षयेल्लवणं त्यजेत्।।87।।
(भै. र., फिरङ्ग रोग)

द्वीपान्तर वचातिक्ता चोष्णा चाग्निप्रदीपनी।
धातुवृद्धिकरी बल्या मलमूत्रविशोधिनी।।
तारूण्यदा पौष्टिकी च वृष्या चैव रसायनी।
गर्भप्रदा बद्धाविट्काऽध्मानोन्माद विनाशिनी।।
वातं शूलमपस्मारं धातुक्षयविनाशिनी।
अंगग्रहं फिरंगोपदशं मान्द्यं कटीग्रहम्।
पक्षाघातमुरूस्तम्भं राजायक्ष्मव्रणांस्तथा।
गण्डमालां नेत्ररोगं शुक्रशोणितदोषकम्।।
सर्वांगकम्पवातं च कुब्जवातं च नाशयेत्।
(नि: र:)

## मेदासकः (काष्ठम्)

मेदासको लघुः स्निग्धः कटुस्तिक्तः कषायकः।
उष्णो वातकफौहन्ति शोथशूलविनाशनः।।
दीपनः स्तम्भनश्चैव सर्ववार्ताविकारनुत्।
अग्निमांद्येऽतिसारे च रक्तस्रावे च युज्यते।।स्व.।।
[द्र. गु. वि.II , प्रो. प्रि. व्र. शर्मा]

## मेषश्रृङ्गी (पत्रम्)

सालसार. . . . मेषशृङ्ग. . . . . कालीयकं चेति।।8।।
सालसारादिरित्येष गणः कुष्ठविनाशनः।
मेहपाण्ड्वामयहरः कफमेदोविशोषणः।।9।।
(सु. सू. 38)

असनादिर्विजयते श्वित्रकुष्ठकफक्रिमीन्।
पाण्डुरोगं प्रमेहं च मेदोदोषनिबर्हणः।।20।।
(अ.ह.सू. 15)

अजश्रृङ्गी हिमा स्वादुः शोफतृष्णावमीर्जयेत्।।
चक्षुष्या श्वासहृद्रोगविषकासार्तिकुष्ठनुत्।।86।।
(ध.नि., गुडूच्यादि वर्ग)

श्रृङ्गिका तुवरा तिक्ता दाहपित्तकफास्रहा।
निहंति तिमिरश्वासकासव्रण विषकृमीन्।।738।।
(कै. नि., ओषधि वर्ग)

अजशृङ्गी कटुस्तिक्ता कफार्शःशूलशोफजित्।
चक्षुष्या श्वासहृद्रोगविषकासातिकुष्ठजित्।।
(रा. नि., प्रभद्रादि वर्ग)

मेषश्रृङ्गी रसे तिक्ता वातला श्वासकासहृत्।
रूक्षा पाके कटुः पित्तव्रणश्लेष्माक्षिशूलनुत्।।254।।
(भा.प्र.नि., गुडूच्यादि वर्ग)

अजशृङ्गी तु कासघ्नी वातनुत विषनाशनी।
रेचनी चाक्षिभैषज्यमर्शोदन्तकृमीन् जयेत्।
(नि. र.)

## मेषश्रृङ्गी (मूलम्)

कालीयकं चेति।।8।।
सालसार. . . . मेषशृङ्ग. . . . .
सालसारादिरित्येष गण: कुष्ठविनाशन:।
मेहपाण्ड्वामयहर: कफमेदोविशोषण:।।9।।
(सु. सू. 38)

असनादिर्विजयते श्वित्रकुष्ठकफक्रिमीन्।
पाण्डुरोगं प्रमेहं च मेदोदोर्षनिबर्हण:।।20।।
(अ.ह.सू. 15)

अजश्रृङ्गी हिमा स्वादु: शोफतृष्णावमीर्जयेत्।।
चक्षुष्या श्वासहृद्रोगविषकासार्तिकुष्ठनुत्।।86।।
(ध.नि., गुडूच्यादि वर्ग)

श्रृङ्गिका तुवरा तिक्ता दाहपित्तकफास्रहा।
निहंति तिमिरश्वासकासव्रण विषकृमीन्।।738।।
(कै. नि., ओषधि वर्ग)

अजशृङ्गी कटुस्तिक्ता कफार्श:शूलशोफजित्।
चक्षुष्या श्वासहृद्रोगविषकासातिकुष्ठजित्।।
(रा. नि., प्रभद्रादि वर्ग)

मेषश्रृङ्गी रसे तिक्ता वातला श्वासकासहृत्।
रूक्षा पाके कटु: पित्तव्रणश्लेष्माक्षिशूलनुत्।।254।।
(भा.प्र.नि., गुडूच्यादि वर्ग)

अजशृङ्गी तु कासघ्नी वातनुत विषनाशनी।
रेचनी चाक्षिभैषज्यमर्शोदन्तकृमीन् जयेत्।
(नि. र.)

## नन्दी (प्रकन्द)

न्यग्रोधोदुम्बराश्वत्थ----------------------
पलाशा नन्दीवृक्षश्चेति ।। 48 ।।
न्यग्रोधादिर्गणो व्रण्यः संग्राही भग्नसाधकः ।
रक्तपित्तहरो दाहमेदोघ्नो योनिदोषहृत् ।। 49 ।।
(सु.सू. 38)

नन्दीवृक्षो लघुः स्वादुः कषायोष्णः सतिक्तकः ।। 446 ।।
कटुपाकरसो ग्राही विषपित्तकफास्रजित्
(कै. नि., औषधि वर्ग)

नन्दीवृक्षो लघुः स्वरदुस्तिवतस्तुवर उष्णकः ।
कटुपाकरसो ग्राही विषपित्तकफास्रजित् ।। 7 ।।
(भा. प्र. नि., वटादि वर्ग)

## नन्दी (का. त्वक्)

अम्बष्ठा धातकी - पलाश नन्दी वृक्षा - - - - - चेति।।46।।
गणौ प्रियङ्गवम्बाष्ठादी- पक्वातीसारनाशनो।
सन्धानीयो हितो पित्ते व्रणानां चापि रोपणो।।47।।
(सु. सू. 38)

न्यग्रोधोदुम्बराश्वत्थ- - - - - नन्दीवृक्षश्चेति।।48।।
न्यग्रोधादिणो व्रण्यः संग्राही भग्नासाधकः।
रक्तपित्तहरो दाहमेदोघ्नो योनिदोषहत्।।49।।
(सु. सू. 38)

युच्चूयूथिका--नदी(न्दी)भल्लातक---कोविदारप्रभृतीनि।।249।।
कषायस्वादुतिक्तानि रक्तपित्तहराणि च
कफ धान्यनिल कुर्युः संग्राहीणि लघूनि च।।250।।
(सु. सू. 46)

न्यग्रोधपिप्पल- - - - - - नन्दी कोलीकदम्ब विरलामधुकं मधूकम्।।41।।
न्यग्रोधादिर्गणो व्रण्यः संग्राही भग्नसाधनः।
मेदः पित्तास्रतृड्दाहयोनिरोगनिर्वहणः।।42।।
(अ. हृ. सू. 15)

नन्दीवृक्षो लघुः स्वादुः कषोयोष्णः सतिक्तकः।।446।।
कटुपाकरसो ग्राही विषपित्तकफास्रजित्।
(कै.नि., ओषधि वर्ग)

नन्दीवृक्षोलघुः स्वादु स्तिक्तस्तुवर उष्णकः।
कटुपाकरसो ग्राही विषपित्तकफास्त्रजित्।।7।।
(भा.प्र.नि., वटादि वर्ग)

# नीलझिण्टी (मूलम्)

मूषकविषे-

अथवा सैर्यकान् मूलं सक्षौद्रं तण्डुलाम्बुना।।30।।

(अ.हृ.उ. 38)

सिराग्रन्थौ नवे पेयं तैलं साहचरं तथा।
उपनाहोऽ निलहरैः बस्तिकर्म सिराव्यधः।।

(शो.)

यदि सहचरमूलं वारिणा संप्रघृष्टं।
पिबति यदि च गोधामांसमश्नाति योषित्।
प्रतिदिनमभिवृद्धिं याति गर्भस्तदानीं
क्रमवशपरिपुष्टैः धातुभिः पूर्यमाणैः।।

[शो.]

नीलपुष्पस्त्वार्त्तगलो राजसैरेयकः स्मृतः।।1049।।
बाणस्त्वोदनपाकी स्यात् शाणकः केशरंजनः।।
सैरेयो मधुरः स्निग्धस्तिक्तोष्णः केशरंजनः।।1050।।
केश्यो बलासवातास्रकुष्ठकण्डूविषं जयेत्।

[कै. नि., ओषधि वर्ग]

झिण्टिकाः कटुकास्तिक्ता दन्तामयशान्तिदाश्च शूलघ्न्यः।
वातकफशोफकासत्वग्दोषविनाशकारिण्यः।।421।।

(रा.नि.गुडूच्यादि वर्ग)

नीले बाणा द्वयोरुक्तो दासी चार्त्तगलश्च सः।।52।।
सैरेयः कुष्ठवातास्रकफकण्डूविषापहः।
तिक्तोष्णो मधुरोऽ नम्लः (पाठा. मधुरो दन्त्यः) सुस्निग्धः केशरंजनः।।56।।

[भा.प्र.नि., पुष्प वर्ग]

## निम्बः (मूल त्वक्)

मदनं मधुकं निम्बं जीमूतं कृतवेधनम्।
पिप्पली कुटजेक्ष्वाकून्येलां धामार्गं वाणि च।।7।।
उपस्थिते श्लेष्मपित्ते व्याधावामाशयाश्रये।
वमनार्थं प्रयुञ्जीत भिषग्देहमदूषयन्।।8।।
(च. सू. 2)

चन्दननलदकृतमाल. . . .निम्बकुटज- मुस्तानीति
दशेमानि कण्डूघ्नानिभवन्ति।।14।।
(च. सू. 4)

आरग्वधमदन. . . . . निम्ब. . . . सुषवी चेति।।6।।
आरग्वधादिरित्येष गणः श्लेष्मविषापहः।
मेहकुष्ठज्वरवमीकण्डूघ्नो व्रणशोधनः।।7।।
(सु. सू. 38)

गुडुचीनिम्बकुस्तुम्बुरू चन्दनानि पद्मकं चेति।।50।।
एष सर्वज्वरान् हन्ति गुडुच्यादिस्तु दीपनः।
हल्लासारोचकवमीपिपासादाहनाशनः।।51।।
(सु. सू. 38)

लाक्षारेवतकुटजा. . . .निम्ब. . . .त्रायमाणा चेति।।64।।
कषायतिक्तमधुरः कफपित्तार्तिनाशनः
कुष्ठकृमिहरश्चैव दुष्टव्रण विशोधनः।।65।।
(सु. सू. 38)

तिक्तस्कन्धमाह-
तिक्तः पटोली. . .. भूनिम्बनिम्बकटुका. .. . वत्सकम्।।28।।
(अ.हृ.सू.10)

क्वाथश्च निम्बमूलस्य दन्तरोगनिवारणः।।14।।
(हा. सं 3/46)

निम्बस्तिक्तरसः शीतो लघुः श्लेष्मास्रपित्तनुत्।
कुष्ठकण्डूव्रणान्हन्ति लेपाहारादिशीलितः।।29।।
अपक्वं पाचयेच्छोफं व्रणं पक्वं विशोधयेत्।
(ध. नि., गुडूच्यादि वर्ग)

निम्बः शीतो लघुर्ग्राही कटुपाकोऽ ग्निवातकृत् ।।38।।
व्रणपित्त कफच्छर्दि कुष्ठहल्लासमेहनुत् ।

(म.पा.नि. पु. क्र. 25)

निम्बस्तिक्तः कटुः पाके लघुः शीतोऽग्निवातकृत् ।।879।।
ग्राह्यहृद्यो जयेत् पित्तकफमेहज्वरकृमीन् ।
कुष्ठकासारुचिश्वास हल्लासश्वयथु व्रणान् ।।880।।

(कै. नि. औषधि वर्ग)

प्रभद्रकः प्रभवति शीततिक्तकः कफव्रणकृमिवमिशोफशान्तये ।
बलासभिदहृविषपित्तदोषजित् विशेषतो हृदयविदाहशान्तिकृत् ।।10।।

(रा. नि. प्रभद्रादि वर्ग)

निम्बः शीतो लघुर्ग्राही कटुपाकोऽ ग्निवातनुत् ।
अहृद्यः श्रमतृट्कासज्वरारुचिकृमिप्रणुत् ।
व्रणपित्तकफच्छर्दि कुष्ठहल्लासमेहनुत् ।।94।।

(भा. प्र. नि., गुडूच्यादि वर्ग)

## निम्बः (पुष्पम्)

चन्दननलदकृतमाल. . . . . निम्बकुटज. . . . .
मुस्तानीति दशेमानि कण्डूघ्नानि भवन्ति।।14।।
(च. सू. 4)

आटरूषक वेत्राग्रगुडूची निम्ब पर्पटाः।।
किराततिक्तसहितास्तिक्ताः पित्तकफापहाः।।270।।
(सु. सू. 46)

रक्तवृक्षस्य निम्बस्य मुष्ककर्ासनस्य च।
कफपित्तहरं पुष्पं कुष्ठघ्नं कुटजस्य च।।284।।
(सु. सू. 46)

निम्बस्तिक्तरसः शीतो लघुः श्लेष्मास्रपित्तनुत्।
कुष्ठकण्डूव्रणान्हन्ति लेपाहारादिशीलितः।।29।।
अपक्वं पाचयेच्छोफं व्रणं पक्वं विशोधयेत्।
(ध. नि., गुडूच्यादि वर्ग)

निम्बवृक्षस्य पुष्पाणि पित्तघ्नानि विशेषतः ।
तिक्तानि च कृमिघ्नानि तथा कफहराणिच।।
(शा. नि., पृ. 239)

निम्बः शीतो लघुर्ग्राही कटुपाकोऽ ग्निवातकृत्।
व्रणपित्तकफच्छर्दिकुष्ठ हल्लासमेहनुत।
(म. नि., पृ. क्र. 25)

चक्षुष्यं निम्बपुष्पञ्च कृमिपित्तविषप्रणुत्।।883।।
वातलं कटुपाकंस्यात् सर्वारोचक नाशनम्।।
(कै. नि., औषधि वर्ग)

प्रभद्रकः प्रभवति शीततिक्तकः कफव्रणकृमिवमिशोफशान्तये।

बलासभिदहुविषपित्तदोषाजिदिशेषतोहृदयावि दाहशान्तिकृत्।।10।।
(रा. नि., प्रभद्रादिवर्ग)

निम्बः शीतो लघुर्ग्राही कटुपाकोऽग्निवातनुत्।
अहृद्यः श्रमतृट्कासज्वरारूचिकृमिप्रणुत्।
व्रणपित्तकफच्छर्दि कुष्ठहल्लासमेहनुत्।।94।।
(भा. प्र. नि., गुडूच्यादि वर्ग)

## निम्बम् (फलम्)

मदनं मधुकं निम्बं जीमूतं कृतवेधनम्।
पिप्पली कुटजेक्ष्वाकून्येलां धामार्गं वाणि च।।7।।
उपस्थिते श्लेष्मपित्ते व्याधावामाशयाश्रये।
वमनार्थं प्रयुञ्जीत भिषग्देहमदूषयन्।।8।।
(च. सू. 2)

गुडूचिनिम्बकुस्तुम्बुरू....... पद्मकं चेति।।50।।
एष सर्वज्वरान् हन्ति गुडुच्यादिस्तु दीपनः।
हृल्लासारोचकवमीपिपासादाहनाशनः।।51।।
(सु. सू. 38)

निम्बातसी...... शिग्रुसर्षप सुवर्चलाविडङ्ग
ज्योतिष्मतीफलतैलानि तीक्ष्णानि लघून्युष्णवीर्याणि
कटूनि कटूविपाकानि सराण्यनिल कफकृमिकुष्ठप्रमेह
शिरोरोगापहराणि चेति।।115।।
(सु. सू. 45)

नात्युष्णं निम्बजं (तैलं) तिक्तं कृमिकुष्ठकफप्रणुत्।।60।।
(अ. हृ. सू. 5)

निम्बस्तिक्तरसः शीतो लघुः श्लेष्मास्रपित्तनुत्।
कुष्ठकण्डूव्रणान्हन्ति लेपाहारादिशीलितः।।29।।
अपक्वं पाचयेच्छोफं व्रणं पक्वं विशोधयेत्।
(ध. नि., गुडूच्यादि वर्ग)

नात्युष्णं निम्बजं तैलं कृमिपित्तकफापहम्।
वातपित्तप्रशमनं मदारश्मीरुजापहम्।।136।।
(ध. नि., सुवर्णादि वर्ग.)

तत्फलम् भेदनं स्निग्धमुष्णमं कुष्ठहरं लघु।
अपक्वं पाचयेन्निम्बः पक्वं च परिशोधयेत्।
(म.पा.नि. पृ. क्र. 25)

फलं तिक्त रसे पाके कटुकं भेदनं लघु ।।884।।
अरूक्षमुष्णं कुष्ठघ्नं गुल्मार्शः कृमिमेहनुत्।
निम्बस्य पक्वं मधुरं सतिक्तं स्निग्धं फलं शोणित पित्तरोगे।
कफे प्रशस्तं नयनामयघ्नं क्षतक्षयघ्नं गुरू पिच्छिलञ्च।।885।।
निम्ब बीजस्य मज्जा च कृमि कुष्ठ विशोधनः।

(के. नि., ओषधि वर्ग)

प्रभद्रकः प्रभवति शीततिक्तकः कफव्रणकृमिवमिशोफशान्तये।
बलासभिद्बहुविषपित्तदोषाजिद्विशेषतोहृदयविदाहशान्तिकृत्।।10।।

(रा. नि., प्रभद्रादिवर्ग)

निम्बफलं रसे तिक्तं पाके तु कटुभेदनम्।
स्निग्धं लघूष्णं कुष्ठघ्नं गुल्मार्शः कृमिमेहनुत्।

(भा. प्र. नि., गुडूच्यादि वर्ग)

आमं फलं रसे तिक्तं पाके तु कटुकं मतम्।
स्निग्धं लघूष्णं कुष्ठघ्नं गुल्मार्शः कृमिमेहनुत।।
निम्बस्य पक्वं मधुरं सुतिक्तं स्निग्धं फल शोणित पित्तरोगे।
कफे प्रशस्तं नयानामयघ्नं, क्षतक्षयघ्नं गुरू पिच्छिलं च।।

(शा.नि.,गुडुच्यादि वर्ग, पृ.240)

**पलाश:(बीजम्)**

---------- पलाशतैलानि मधुरकषायाणि कफपित्तप्रशमनानि।।121।।

(सु. सू. 45)

बीजं तु कटुकं स्निग्धमुष्णं कृमिबलासजित्।।150।।

[ध. नि., आम्रादि वर्ग]

तद्बीजं कृमिविध्वंसि काण्डा रसायने हितः।

[सो. नि.]

तृड्दाहकफपित्तास्रकुष्ठहृत् फलमस्य च।।834।।

[कै. नि., ओषधि वर्ग]

तद्बीजं पामकण्डूतिदद्रुत्वग्दोषनाशकृत्।।37।।

[रा. नि., करवीरादि वर्ग]

फलं लघूष्णं मेहार्शकृमिवातकफापहम्।।

विपाके कटुकं रूक्षं कुष्ठं गुल्मोदरप्रणुत्।।53।।

(भा.प्र.नि., वटादि वर्ग)

## पलाशः (पुष्पम्)

किंशुकं पुष्पं कफपित्तघ्नम्।।288।।
(सु. सू. 46)

प्लीहगुल्मग्रहण्यर्शोवातश्लेष्मविनाशनः।
किंशुकस्यापि कुसुमं सुगन्धि मधुरं च यत्।।150।।
[ध. नि. आम्रादि वर्ग]

तत् पुष्पं स्वादु तिक्तकम्।
तृड्दाहकफपित्तास्रकुष्ठहृत्।।834।।
[कै. नि., ओषधि वर्ग]

तस्यपुष्पंच सोष्णश्च कण्डूकुष्ठार्त्तिनाशनम्।।38।।
रक्तःपीतःसितो नीलः कुसुमैस्तु विभज्यते।।39।।
[रा. नि., करवीरादि वर्ग]

तत्पुष्पं स्वादु पाके तु कटु तिक्तं कषायकम्।।51।।
वातलं कफपित्तास्रकृच्छ्रजिद् ग्राहि शीतलम्।
तृड्दाहशमकं वातरक्तकुष्ठहरं परम्।।52।।
[भा.प्र.नि., वटादि वर्ग]

## पारसीक यवानी (बीजम्)

पारसीकयवानिका पीता पर्युणितवारुणा प्रातः।
गुडपूर्वा कृमिजालं कोष्ठगतं वातयत्याशु।।
(वृन्दमाधव-I)

यवानी यावनी रूक्षा ग्राहिणी मादिनी कटुः।।91।।
(ध. नि., शतपुष्पादि वर्ग)

पारसीकयवानी तु यवानीसदृशी गुणैः।
विशेषात् पाचनी रूच्या ग्राहिणी मादिनी गुरूः।।80।।
(भा.प्र.नि., हरीतक्यादि वर्ग)

खुरेसानी यवानी तु कटुरूक्षा च पाचका।
ग्राहकोष्णा मादका च गुर्वीवातकरा (शु. पाठ. वातहरा) मता।।
(नि. र.)

## पट्टूर (सं.व.)

गोरक्षगञ्जा तुवरा सतिक्ता लघ्वी च तीक्ष्णा परमोष्ण वीर्या ।
कफार्तिहृत् मूत्रविरेचनीया प्रभावतोऽप्यश्मरिनाशनी स्यात् ।।स्व.।।
(प्रो.प्रि.व्रत् शर्मा, द्र.गु.वि.II, अपामार्गकुल)

## पीलु (फलम्)

पीलु----------------------दोषघ्नं गरहारि।
(च. सू.27)

तिक्तं पित्तकरं तेषां सरं कटुविपाकिच ।
तीक्ष्णोष्ण कटुकं पीलु सस्नेहं कफवातजित्
(सु. सू.46)

गुल्मे पीलूनि पिष्टानि पिबेत् सलवणानि तु ।।64।।
(सु. उ.42)

रक्तपित्तहरः पीलुः फलं कटुविपाकि च ।
अर्शोघ्नं बस्तिशमनं सस्नेहं कफवातजित् ।।45।।
पीलुजं रसे स्वादु गुल्मार्शोघ्नं तु तीक्ष्णकम् ।
(ध.नि., आम्रादि वर्ग)

पीलूष्णमूषणं पाक रसयोर्भिदि दीपनम् ।
तीक्ष्णं विदाहि पित्तास्रजननं सन्नियच्छति।।453।।
गुल्मार्शः कफवातास्रप्लीहानाहगरोदरम्।
तत् स्वादु तिक्तं दोषघ्नं सोष्णं रूक्षं रसायनम् ।।454।।
(कै.नि., ओषधि वर्ग)

पीलुः श्लेष्मसमीरघ्नं पित्तलं भेदि गुल्मनुत्।
स्वादुतिक्तं च यत्पीलु तन्नात्युष्णं त्रिदोषहृत्।।28।।
(भा. प्र. नि; आम्रादिफल वर्ग)

**पीलुः (पत्र, मूलत्वक्)**

पीलु. . . . . . . दोषघ्नंगरहारिच ।।42।।
(च.सू.27)

द्राक्षाकाश्मर्य. . . . . . . . . . . . . . . . पीलूनीति दशेमानि
विरेचनोपगानि भवन्ति ।।24।।
(च.सू. 4)

सारिवाशर्करापाठा . . . . पीलुपरूषका . . .ज्वरहराणि भवन्ति ।।39।।
(च.सू.4)

पिप्पलीविडङ्गापामार्ग . . . पीलु जातीशालतालमधुक . . .
शिरोविरेचनानि ।।6।।
(सु.सू.39)

गुल्मे-एवं पीलूनि भृष्टानि पिबेत् सलवणानि तु ।।64।।
(सु.उ.42)

रक्तपित्तहरः पीलुःफलं कटु विपाकि च ।
अर्शोघ्नं बस्तिशमनं सस्नेहं कफवातजित् ।।45।।
पीलुजं च रसं स्वादु गुल्मार्शोघ्नं तु तीक्ष्णकम् ।
(ध.नि. आम्रादि वर्ग)

पीलूष्णमूषणं पाकरसयोर्भेदि दीपनम् ।
तीक्ष्णं विदाहि पित्तास्रजननं सन्नियच्छति ।।453।।
गुल्मार्शःकफवातास्रप्लीहानाहगरोदरम् ।
तत् स्वादु तिक्तं दोषघ्नं सोष्णं रूक्षं रसायनम् ।।454।।
(कै.नि., ओषधि वर्ग)

पीलुः श्लेष्मसमीरघ्नं पित्तलं भेदि गुल्मनुत् ।
स्वादु तिक्तं च यत्पीलु तन्नात्युष्णं त्रिदोषहत् ।।128।।
(भा.प्र.नि., आम्रादिफल वर्ग)

## पोटगल (मूलम.)

हिमा शुक्रवृद्धिकरी चक्षुष्या वातकोपना ।
मूत्रकृच्छ्राश्मरीदाहपित्तशोणितघ्नी च ।।
(रा.नि.)

एरका शिशिरा वृष्या चक्षुष्या वातकोपिनी ।
मूत्रकृच्छ्राश्मरीदाहपित्तशोणितनाशिनी ।।164।।
(भा.प्र.नि., गुडूच्यादि वर्ग)

## पुदिनः (सं. व.)

रोचनी वन्हिजननो वक्त्रजाड्यनिषूदनी।
कफवातहरी बल्या छर्द्यरोचक वारिणी।।
(आयुर्वेद विज्ञान)

अरोचवैरस्ययकृद्वमिक्रिमिप्रभञ्जनश्लेष्मगद्प्रभञ्जनः ।
रूक्षस्तथोष्णः सुरभि रजःप्रदः पोदनिकः कल्कविधौ प्रशस्यते ।।
(सि. भे.म.)

पूतिहा कटुरूष्णश्च रोचनो दीपनो लघुः ।
हन्ति वातकफाध्मानशूलच्छर्दिकृमींस्तथा ।।स्व. ।।
[द्र.गु.वि., प्रो. पी.वी.शर्मा]

## पुल्लानि (सं. व. मूल,पत्र, काण्ड)

कृमिपित्तहरा तिक्ता भेदिनी कफनाशिनी ।
पाण्डुकुष्ठविकारघ्नी कारवल्ली ज्वरापहा ।।
(म.पा.नि)

जलजं कारवेल्लं स्यात् तिक्तं भेदकरं मतम् ।
कफं कुष्ठं पाण्डुरोगं कृमीन् पित्तं च नाशयेत्।।
(नि.र.)

कारवेल्लं तु जलजं कृमिपित्तकफे हितम् ।।594।।
(कै.नि., ओषधि वर्ग)

## पूतिकरञ्जः (का. त्वक्)

शोफघ्नं उष्णवीर्य च पत्रं पूतीकरञ्जम् ।।278।।
(सु. सू. 46)

पूतीकरञ्जपत्राणां रसं वाऽपि यथाबलम् ।।159।।
(सु. चि. 19)

करञ्जो नक्तमालश्च् करजश्चिरबिल्वकः ।
घृतपूर्णकरञ्जोऽन्यः प्रकीर्यः पूतिकोऽपि च ।।119।।
स चोक्तः पूतिकरञ्जः सोमवल्कश्चस स्मृतः ।
करञ्जः कटुकस्तीक्ष्णों वीर्योष्णो योनि दोषहत् ।
कुष्ठोदावर्तगुल्मार्शोव्रणक्रिमिकफापहः ।।120।।
(भा.प्र.निघण्टु, गुडूच्यादि वर्ग 119-120)

## पूतिकरञ्जः (का. त्वक्)

शोफघ्नं उष्णवीर्यं च पत्रं पूतीकरञ्जम् ।।278।।
(सु. सू. 46)

पूतीकरञ्जपत्राणां रसं वाऽपि यथाबलम् ।।159।।
(सु. चि. 19)

करञ्जो नक्तमालश्च् करजश्चिरबिल्वकः ।
घृतपूर्णकरञ्जोऽन्यः प्रकीर्यः पूतिकोऽपि च ।।119।।
स चोक्तः पूतिकरञ्जः सोमवल्कश्चस स्मृतः ।
करञ्जः कटुकस्तीक्ष्णो वीर्योष्णो योनि दोषहत् ।
कुष्ठोदावर्तगुल्माशोव्रणक्रिमिकफापहः ।।120।।
(भा.प्र.निघण्टु, गुडूच्यादि वर्ग 119-120)

## रोहिषं (सं. व.)

रोहिषङ्कटुकम्पाके तिक्तोष्णन्तुवरञ्जयेत्।
कुष्ठहृद्रोगपित्तास्रशूलकास कफज्वरान्।।168।।
(म. पा. नि.)

रोहिषं तुवरं तिक्तं कटुपाकं व्यपोहति।
हृत्कण्ठ व्याधिपित्तास्रशूलकासकफज्वरान्।।168।।
(भा. प्र. नि., गुडूच्यादि वर्ग.)

## रूमी मस्तगी (रालः)

रूमजो मस्तकीगुन्द्रो दशनस्थिरताकरः।
(सि. भे. म.)

मधुरो मस्तकीगुन्द्रो लघुरुष्णः सुगन्धयुत्।
कफघ्नो मूत्रलो वृष्यः संग्राही दीपनो मतः।।स्व.।।
(प्रो. प्रि. व्र. शर्मा, द्र. गु. वि. II,260)

## सरलस्त्राव:

जम्बु-------- श्रीवेष्टकभृष्टमृत्------- तिलकणा इति
दशेमानि पुरीषविरजनीयानि भवन्ति।।32।।

(च. सू. 4)

एलातगर . . . . श्रीवेष्टक . . . . . पुन्नागकेशरं चेति ।।24।।
एलादिको वातकफौ निहन्याद्विषमेवच ।
वर्णप्रसादन: कण्डूपिडकाकोठनाशन: ।।25।।

(सु.सू. 38)

सरल . . . . . . सारस्नेहास्तिक्तकटुकषाया: दुष्टव्रणशोधना:
कृमि कफकुष्ठानिलहराश्च ।।123।।

(सु.सू. 45)

एलायुग्म . . . . . . श्रीवासक: कुंकुमं . . . . पुन्नागनागाह्वयम् ।।43।।
एलादिको वातकफौ विषं च विनियच्छति ।
वर्णप्रसादन: कण्डूपिटिकाकोठनाशन: ।।44।।

(अ.हृ.सू.15)

श्रीवेष्ट: स्वादुतिक्तस्तु कषायो व्रणरोपण: ।
कफपित्तास्रजान् हन्ति ग्रहघ्न:शीर्षरोगनुत् ।।12।।

(ध.नि., चन्दनादि वर्ग)

श्रीवासो मधुरस्तिक्त: स्निग्धोष्णस्तुवर: सर:।
पित्तलो वातमूर्द्धाक्षिस्वररुक्कफपीनसान् ।।1316।।
रक्षोघ्न: स्वेददौर्गन्ध्ययूकाकण्डूव्रणान् जयेत् ।

(कै.नि., ओषधि वर्ग)

श्रीवेष्ट: कटुतिक्तश्च कषाय: श्लेष्मपित्तजित्।
योनिदोषरुजाजीर्णव्रणध्मानदोषजित् ।।151।।

(रा.नि., चन्दनादि वर्ग)

श्रीवासो मधुरस्तिक्त: स्निग्धोष्णस्तुवर: सर: ।।
पित्तलो वातमूर्द्धाक्षिस्वररोगकफापह: ।
रक्षोघ्न: स्वेददौर्गन्ध्ययूकाकण्डूव्रणप्रणुत् ।।47।।

(भा.प्र.नि., कर्पूरादि वर्ग)

## सर्पगन्धा (मूलम्)

विषे---- एकसर गणे ।।84।।
(सु. क. 5)

मूषिकविषे---- ।।29।।
(सु. क. 7)

मानसरोगे--- अपराजितगणे।।47।।
(सु. उ. 60)

सर्पगन्धाऽतितिक्तोष्णा रूक्षा कटुविपाकिनी।
पित्तवृद्धिकरी रुच्या शूलप्रशमनी सरा।।
कफवातहरा निद्राप्रदा हृदवसादिनी।
कामावसादिनी चैव हन्ति शूलज्वरकृमीन।।
अनिद्रां भूतमुन्मादमपस्मारं भ्रमं तथा।
अग्निमांद्यं विषं रक्तवाताधिक्यं व्यपोहति।।
(द्र.गु.वि.II, प्रो. प्रि. व्र. शर्मा)

विषघ्नी कटुतिक्तोष्णा मूत्रला मदनाशिनी।
कफवातव्रणहरी तन्त्रवेगप्रवर्त्तनी।।
योानिशूलज्वरहरी मलपाचनदीपनी। (स्व.)
(इंडि. मेडि. प्लॉट्स कोट्टाकल)

## श्वेतपुनर्नवा (मूल)

पुनर्नवा (श्वेत-डल्हण) वरुणतर्कार्युरूबूकवत्सादनीबिल्वशाकप्रभृतीनि।
उष्णानि स्वादुतिक्तानि वातप्रशमनानिच।।254।।

[सु. सू. 46]

क्षौद्रेणाऽखुविषे लिह्यात् श्वेतान्चापि पुनर्नवाम्।।24।।

अलर्क विषे-
श्वेतां पुनर्नवान्चास्य दद्याद्धत्तूरकायुताम्।।52।।

(सु. क. 7)

धवलपुनर्नवाजटया तण्डुलजलपीतया च पुष्यर्क्षे।
अपहरति विषधरविषोपद्रवं मासं संवत्सरं पुंसाम्।(चक्रदत्त)

यः पिबति पुष्यदिवसे जलपिष्टं सितपुनर्नवा मूलम्।
तत्सन्निधौ न वर्षं वृश्चिकभुजगाः प्रसर्पन्ति।।9।।

(राज मा. 29)

मूलं समं तण्डुलधावनेन प्रपेषितं श्वेतपुनर्नवायाः
पीतं भवेत् प्लीहविनाशहेतु पाठाजटा छिन्नरुहाजटा वा।।5।।

(राज मा.7)

सितपुनर्नवामूलं पीतञ्च गोसलिलेन निहन्ति।
शोथं सर्वसमुत्थमुदराणि च दुस्तराण्यचिरात्।।74।।

(वंगसेन, शोथ)

पुनर्नवायाः श्वेतायाः तैलं मूलेन् साधितम्।
वातकण्टकमाहन्यात् पादाभ्यंगेन मर्दनात्।।140।।

(वंगसेन, वातव्याधि)

सितवर्षाभूमूलं पयसा पीतञ्च पैत्तिकं जयति।
चातुर्थिकं (ज्वर) सुचिरजं ताम्बूलेनैव भक्षणादथवा।।580।।

(वंगसेन, ज्वर)

पुनर्नवा भवेदुष्णा तिक्ता रूक्षा कफापहा।
सशोफपाण्डुहृद्रोगकासोरःक्षतशूलनुत्।।265।।

[ध. नि., गुडूच्यादि वर्ग]

श्वेता पुनर्नवा सोष्णा तिक्ता कफविषापहा।
कासहृद्रोगशूलास्रपाण्डुशोफानिलार्त्तिनुत्।।116।।
(रा.नि., पर्पटादि वर्ग)

पुनर्नवा श्वेतमूला शोथघ्नी दीर्घपत्रिका।
कटुकषायानुरसा पाण्डुघ्नी दीपनी परा।
शोफानिलगरश्लेष्महरी ब्रध्नोदरप्रणुत्।।231।।
[भा. प्र. नि., गुडूच्यादि वर्ग]

## तैलपर्णः (पत्रम्)

हरिद्रुमो ज्वरहरः कीटमर्दश्च तिक्तकः।।
कफपित्तहरस्तिक्तः सुगन्धः पूतिनाशकः।

बलप्रदो रुचिकरी क्षताक्षेपविनाशजः।
जीर्णबाष्पविषमज्वरहृत् कामशूलनुत्।।
तैलं दुर्गन्धहरणं पत्रं सर्वरूजापहम्।
सम्पर्कादस्य नश्यन्ति सर्वरोगा न संशय।।
[आ. वि.]

तैलपर्णः लघुः स्निग्धः कटुतिक्तकषायकः।
वीर्योष्णः कफवातघ्नः पूतिजन्तुहरः स्मृतः।।
जीर्णकासे प्रतिश्याये स्वरभेदे च शस्यते।
[द्र.गु.वि., प्रो. पी. वी. शर्मा]

तैलपर्णः कटुस्तिक्तः कषायोष्णो लघुः स्मृतः।
दीपनः पाचनो हृद्यो मूत्रलो ज्वरनाशकः।।
जीर्णकासशिरः शूलकफदौर्गन्ध्यनाशनः।
पूयमेहक्षयश्वासतन्तुकृमिविकारनुत्।।
अग्निमान्द्य प्रतिश्यायवस्तिरोग प्रवाहिकाः।
स्वरभेदयकृत्प्लीहदृगदांश्च विनाशयेत्।।स्व.।।
[इंडियन मेडीसीनल प्लांट्स, कोट्टाकल]

## तिनिशः (का. म.)

सालसाराजकर्ण- तिनिशचन्दन कालीयकं चेति ।।8।।
सालसारादिरित्येष गणः कुष्ठविनाशनः
मेहपाण्ड्वामयहरः कफमेदोविशोषणः।।9।।
(सु. सू. 38)

श्वित्रकुष्ठकफच्छेदी व्रणघ्नः कृमिनाशनः।
पाण्डुरोगप्रेमहघ्नो तिनिशो मेदुरो हिमः।।
(म.नि.)

तिनिशस्तुवरो हन्ति श्वित्रकुष्ठव्रणकृमीन्।
प्रमेहपाण्डुतादाहाबलासं पित्तमेदसी।।815।।
(के. नि. ओषधि वर्ग)

तिनिशस्तु कषायोष्णः कफरक्तातिसारजित्।
ग्राहको दाहजननो वातामयहरः परः।।25।।
(रा.नि., प्रभद्रादिवर्ग)

तिनिशः श्लेष्मपित्तास्रमेदः कुष्ठप्रमेहजित्।
तुवरः श्वित्रदाहघ्नो व्रणपाण्डुकृमिप्रणुत।।76।।
(भा.प्र.नि., वटादि वर्ग)

तिनिशस्तुवरश्चोष्णो ग्राहकः कफवातहा।
रक्तातिसारं कुष्ठं च मेहमेदं व्रणं तथा।।
रक्तदोषं च पित्तं च श्वित्रकुष्ठं कृमींस्तथा।
दाहं च पाण्डुरोगं च नाशयेदिति कीर्त्तितः।।
(नि.र.)

## तिन्तिडीकम् (फलम्)

वातापहं तिन्तिडीकमामं पित्तबलासकृत्।
ग्राह्युष्णं दीपनं रुच्यं संपक्वं कफवातनुत्।।159।।
[सु. सू. 46]

तिन्तिडीकं समीरघ्नमाममुष्णं परं गुरु।
तत्पक्वं लघु संग्राही ग्रहणीकफवातजित्।।88।।
[म. नि. वर्ग 6]

**तिन्तिडीकः (सं. व.)**

वातापहं तिन्तिडीकमामं पित्तबलासकृत्।
ग्राह्युष्णं दीपनं रुच्यं संपक्वं कफवातनुत्।।159।।
[सु. सू. 46]

तिन्तिडीकं समीरघ्नमाममुष्णं परं गुरु।
तत्पक्वं लघु संग्राही ग्रहणीकफवार्तजित्।।88।।
[म. नि. वर्ग 6]

## त्रपुषम्(बीजम)

त्रपुसैर्वारूकं स्वादु गुरू विष्टम्भि शीतलम्।।110।।
मुखप्रियं च रूक्षं च मूत्रलं त्रपुसं त्वति।

(च. सू. 27)

किरातंतिक्तकातिमुक्तक- - - - त्रपुसैर्वारूक- - - - तैलानि मधुराणि मधुरविपाकानि वातपित्तप्रशमनानि शीतवीर्याण्यभिष्यन्दीनि सृष्टमूत्राण्यंग्निसादनानि चेति ।।120।।

(सु. सू. 45)

त्रपुसैर्वारूकं - - - - - - - - - - - - प्रभृतीनि।।216।।
स्वादु तिक्तरसान्याहु: कफवातकराणि च।।
सृष्टमूत्रपुरीषाणि रक्तपित्तहराणि च ।।217।।

(सु. सू. 46)

त्रपुसं कटुकं तिक्तं - - - - - - - - - - - - - - - ।।172।।
- - - त्रपुसं छर्दिहत् प्रोक्तं मूत्रबस्तिविशोधनम्।

(ध. नि., गुडूच्यादि वर्ग)

त्रपुसं मूत्रलं शीतं रूक्षं पित्ताश्मकृच्छ्रनुत्।
तत्पक्वमुष्णमम्लं स्यात्पित्तलं कफवातजित्।।13।।

(म.पा.नि., शाकवर्ग)

तिक्तं स्वादु हिमं रूक्षं मूत्रकृच्छ्रास्रपित्तजित्।
तत् पाण्डु कफकृज्जीर्णमम्लं वातकफापहम्।।549।।

(कै. नि., ओषधि वर्ग)

स्यात् त्रपुसीफलं रूच्यं मधुरं शिशिरं गुरू।
भ्रमपित्तविदाहार्त्तिवान्तिहृद्बहुमूत्रदम्।।206।।

(रा.नि., मूलकादि वर्ग)

तद्बीजं मूत्रलं शीतं रूक्षं पित्तास्त्रकृच्छ्रजित्।।48।।

(भा.प्र.नि., आम्रादि फलवर्ग)

कषायो - - - - - अशेषमूत्रकृच्छ्रजित्।
पीतञ्च त्रपुसबीजं सतिलाजयपयोन्वितम्।।40।।

(भा.प्र.चि. )

त्रपुसबीजं पयसा पीतं वा नारिकेरजं कुसुमम्।
विण्मूत्रशर्करायां भवति सुखी कतिपयैर्दिवसै:।।50।।

(भा.प्र.चि. )

## तूनी (काण्डत्वक्)

अम्बष्ठाधातकी . . . . . . नन्दीवृक्षाः पद्मकेशराणि चेति ।।46।।
गणो प्रियंग्वम्बष्ठादी पक्वातीसारनाशनो ।
सन्धानीयो हितोपित्ते व्रणानां चापिरोपणो ।।47।।
(सु.सू. 38)

करीरं कुलकं नन्दी . . . . . . शकुलादनी ।।77।।
कटिल्लं . . . . . . . . . . . . . . कर्कशम् ।
तिक्तं पाके कटु ग्राहि वातलं कफपित्तजित् ।। 78।।
(अ.हृ.सू. 6)

न्यग्रोध . . . . नन्दी कोलीकदम्ब . . . . मधूकम् ।।41।।
न्यग्रोधादिर्गणोव्रण्यः संग्राही भग्नसाधनः ।
मेदः पित्तास्रतृड्दाहयोनिरोगनिबर्हणः ।।42।।
(अ.हृ.सू. 15)

**वन्दा(-क :) (सं. व. , फलम्, पुष्पम्, मूलम्, पत्रम् , काण्ड)**

जीवक----- मेदा वृद्धरुहा (पाठा. वृक्षरुहा) जटिला------ इति दशेमानि शुक्रजननानि भवन्ति।।19।।

(च. सू. 4)

शटी----- बृहतीवृक्षरुहाभया------- इति दशेमानि हिक्कानिग्रहणानि भवन्ति।।30।।

(च. सू. 4)

वृक्षादनी------ इत्कटमूलानीति दशेमानि मूत्रविरेचनीयानि भवन्ति।।35।।

(च. सू. 4)

संहर्षा शतावरी------- मधुरस्कन्धः।।146।।

(च. वि. 8)

वीरतरु ----- दर्भवृक्षादनीगुन्द्रा------ श्वदंष्ट्रा चेति।।12।।
वीरतर्वादिरित्येष गणो वातविकारनुत्।
अश्मरीशर्करामूत्रकृच्छ्राघातरुजापहः।।13।।

(सु. सू. 38)

वृक्षादनी वातहरा---- ।।252।।

(सु. सू. 46)

अर्शे- कुटजबन्दाकमूलकल्कं वा तक्रेण।।13।।

(सु. चि. 6)

पिण्डारकतरु संभवबन्दार्काशफा जयति सर्पिषा पीता।
श्लीपदमुग्रं नियतं बद्धा सूत्रेण जंघायाम् ।।4।।

(वृन्दमाधव, 42)

वन्दाकः शीतलः पाके ग्राही स्याद्व्रणरोपणः।।86।।

[ध. नि., करवीरादि वर्ग]

वृक्षादनी हिमा तिक्ता कषाया मधुरा रसे।
मांगल्या कफवातस्रव्रणरक्षोग्रहापहा।।855।।

[के. नि., ओषधि वर्ग]

वन्दाकः तिक्तशिशिरः कफापित्तश्रमापहः।
वश्यादि सिद्धिदो वृष्यः कषायश्च रसायनः।।70।।
[रा. नि., पर्पटादि वर्ग]

वन्दाकः स्याद्धिमस्तिक्तः कषायो मधुरो रसे।
मंगल्यः कफफ्तिास्त्ररक्षोव्रणविषापहा।।261।।
[भा.प्र.नि., गुडूच्यादि वर्ग]

बन्दाकमौदुम्बरमादरेण वन्ध्यांगना पुष्पविशुद्धिवारे।
पूर्वं विरिक्ता लभते कुमारं छागस्य दुग्धेन सह प्रपीय।।
(वैद्य मनोरमा)

वन्दाको बिल्वभवस्तक्रेण घृतेन वा प्रगे पीतः।
विषमज्वरस्य विकृतिं जयेन्निःशेषमतिविषमाम्।।19।।
(वैद्य मनोरमा, 1)

**वन्यजीरकः (फलम्)**

सोमराज्यां तु सुरसा विषभूतगरापहा ।।659।।
कटुका जंतुहंत्री च बालानां च हितावहा ।
(सो.नि. I)

आरण्यजीरकं चोष्णं तुवरं कटुकं मतम् ।
स्तंभं वातकफं चैव व्रणं चैव विनाशयेत् ।।
(नि.र.)

सोमराजी कटुस्तिक्ता कृमिकुष्ठकफापहा।
तीक्ष्णोष्णा विषकण्डूतिज्वरप्रशमनी च सा ।। स्व.।।
(प्रो.प्रि.व्र.शर्मा, द्र.गु.वि. II)

आरण्यजीरकं तिक्तं तीक्ष्णोष्णं कटुकं लघु ।
कषायं श्वासकासघ्नं हिक्काज्वरविनाशनम् ।।
कुष्ठकण्डूश्वित्रशोफवातश्लेष्मापहं परम् ।
मूत्रलं दीपनं नेत्र्यं गुल्मशूलकृमिप्रणुत् ।। स्व.।।
(इं. मे. प्लँ, कोट्टाक्कल, V, पृ.क्र. 355)

## विदारीकन्द (कन्द)

मधुरो बृंहणो वृष्यः शीतः स्वर्योऽतिमूत्रलः ।
विदारी कन्दो बल्यस्तु वातपित्तहरश्च सः ।।300।।
(सु.स.,सू. 46)

विदारी शिशिरा स्वादुर्गुरूः स्निग्धा समीरजित् ।
पित्तास्रजित्तथा बल्या वृष्याचैव प्रकीर्तिता ।।144।।
(ध.नि., गुडूच्यादि वर्ग)

विदारी मधुरा शीता गुरूः स्निग्धाऽस्रपित्तजित्।
ज्ञेया च कफकृत्पुष्टि बल्या सौर्य्यविवर्द्धिनी ।।101।।
(रा.नि. मूलकादि वर्ग)

विदारी मधुरः स्निग्धा बृंहणी स्तन्यशुक्रदा ।।181।।
शीतास्वर्यामूत्रला च जीवनी बलवर्णदा ।
गुरूः पित्तास्रपवनदाहान् हन्ति रसायनी ।।182।।
(भा.प्र.नि., गुडूच्यादि वर्ग)

## विरला (काण्ड त्वक्)

तिन्दुकप्रियाल------- अरिमेदा इति दशेमान्युददंप्रशमनानि भवन्ति।।43।।
(च. सू. 4)

तिन्दुकमनन्नद्रव्यरुचिकराणाम्।।39।।
शालप्रियक------ तिन्दुककिणिही-------- सारासवा विंशति।।48।।
(च. सू. 25)

तिन्दुक (फलं) कफपित्तघ्नं कषायमधुरं लघु ।।143।।
(च. सू. 27)

अतिदग्धे-
तिन्दुकी त्वक्कपालैर्वा घृतमिश्रैः प्रलेपयेत्।।26।।
(सु. सू. 12)

न्यग्रोधोदुम्बराश्वत्थ--------- कदम्बबदरीतिन्दुकी
---------- नन्दीवृक्षश्चेति ।।48।।
न्यग्रोधादिर्गणो व्रण्यः संग्राही भग्नसाधकः।
रक्तपित्तहरो दाहमेदोघ्नो योनिदोषहृत्।।49।।
(सु. सू. 38)

आमं कषायं संग्राहि तिन्दुकं (फलं) वातकोपनम्।
विपाके गुरु संपक्वं मधुरं कफपित्तजित्।।68।।
(सु. सू. 46)

अतिसारे-
तिन्दुकत्वचमाहृत्य--------- रसं-------- सर्वातीसारनाशनम्।।36-37।।
हारीत सं. 3/3

न्यग्रोधपिप्पल------------------।
---------- कदम्बविरलामधुकं मधूकम् ।।41।।
न्यग्रोधादिर्गणो व्रण्यः संग्राही भग्नसाधनः।
मेदःपित्तास्रतृड्दाहयोनिरोगनिबर्हणः।।42।।
(अ.हृ सू. 15)

## विशाला (मूलम्)

तिक्तस्कन्धे पठितः ।
(अ.हृ.सू. 10)

मदन- - - - - विशाला - -- - छर्दनानि।।1।।
(अ. हृ. सू. 15)

विशालामूललेपस्तु हन्ति पीडां स्तनोत्थिताम्।।36।।
(वृ. मा. 65)

इन्द्रवारुद्वयं तिक्तं कटु पाके रसे लघु।
वीर्योष्णं कामलापित्तकफश्लीपदनाशनम्।।243।।
(ध.नि., गुडूच्यादि वर्ग)

गन्धर्वहस्ततैलेन क्षीरेण विहितं श्रृतम्।
विशालामूलजं चूर्णं वृद्धिं हन्ति न संशयः।।27।।
(भा. प्र. चि. 43)

गवादनीद्वयं तिक्तं पाके कटु सरं लघु।।204।।
वीर्योष्णं कामलापित्तकफप्लीहोदरापहम्।।205।।
श्वासकासापहं कुष्ठगुल्मग्रन्थिव्रणप्रणुत्।
प्रमेहमूढगर्भामगण्डामयविषापहम्।।206।।
(भा.प्र.नि., गुडूच्यादि वर्ग)

वारिघुष्टं विशालायाः मूलभाज्येन संयुतम्।
अधोमुखमधोनाभौ लिम्पेत् सद्यः प्रसूतिकृत्।।27।।
(वै. म. 13)

## व्याघ्रनख (फलम्)

एलातगरकुष्ठ. . . . . . व्याघ्रनख. . . . . . . चेति।।24।।
एलादिको. . . . . . . कण्डूपिडकाकोठनाशनः।।25।।
(सु. सू. 38)

नखद्वयं ग्रहश्लेष्मवातास्रज्वरकुष्ठहृत्।।81।।
लघूष्णं शुक्रलं वर्ण्यं स्वादु व्रणविषापहम्।
अलक्ष्मीमुखदौर्गन्ध्यहृत्पाकरसयोः कटुः।।82।।
(भा.प्र.नि., कर्पूरादि वर्ग)